॥श्री॥

॥ कथारत्नाकरः ॥

गीर्वाण भाषा पण्डित-
णैय्यंगार्य-

KATHÂ-RATNÂKARA

PART I

BY

M. K. TIRUNARAYANA IYENGAR,
Sanskrit Pandit,
Govt. High School, Bangalore.

Printed at the Vichara Darpana Press,
BANGALORE.
1910.

॥श्रीः॥

॥ कथारत्नाकरः ॥

प्रथमः कल्लोलः

कल्याणपुराङ्ग्लेय कलालय गीर्वाण भाषा पण्डित-
मे. कृ. तिरुनारायणैय्यंगार्य-
विरचितः

KATHÂ-RATNÂKARA

PART I

BY

M. K. TIRUNARAYANA IYENGAR,
SANSKRIT PANDIT,
GOVT. HIGH SCHOOL, BANGALORE.

Printed at the Vichara-Darpana Press,
BANGALORE,
1910.

DEDICATED

BY GRACIOUS PERMISSION

TO

His Highness Maharaja

Sri Krishnaraja Wadayar Bahadur,

G. C. S. I.,

MAHARAJA OF MYSORE.

कुवलयविकासहेतुः
सद्गुणसेवारतो नितराम्।
अकलंकमत्र भायात्
पूर्णकलः कृष्णराजनृपचंद्रः ॥ ॥१॥

महीशूरपुराधीशश्रीकृष्णप्रभुसन्निधौ।
अर्पितोऽयं कथारत्नाकरः सफलतामगात् ॥२॥

राजकीयकृपालोकैरिति मोदामहे तराम् ॥
जीयाद्राजा कृतिश्चेयं जगत्याचंद्रतारकम् ॥३॥

उपोद्घातः

आद्ये ग्रंथप्रकाशेऽथ मुपोद्घातः प्रकीर्त्यते ।
प्रायो गीर्वाणभाषाज्ञा आंग्लेयीं नैव जानते ॥ ॥१॥

आंग्लभाषैकशरणा नैव जिघ्रन्ति संस्कृताम् ।
सामानाधिकरण्यं त त्तयो रत्यन्तदुर्लभम् ॥ ॥२॥

अन्योन्यभाषामर्यादा नाऽन्योन्येनाऽवगम्यते ।
किञ्चांग्लेयी मधीयानः प्रारंभादेव कल्पते ॥ ॥३॥

व्यवहर्तुं च तद्भाषामर्यादा मनुसृत्य तु ।
काव्यचंपूनाटकादे रम्यःसाज् ज्ञानवानपि ॥ ॥४॥

कथंचि त्क्षमते वक्तुं वाक्यं गैर्वाणभाषया ।
दुर्ज्ञेयैषा विनोपायै रत स्सर्वै रुपेक्षिता ॥ ॥५॥

विद्वदास्यांधुपतिता बहि रागन्तु मक्षमा ।
हंतेयं धातृरमणी प्राणसंशय मागता ॥ ॥६॥

वर्तेताऽशरणो द्धर्तुं पंडिता अप्युदासते ।
यथा सुकोमलोसिष्ठे देषा योषा महावटात् ॥ ॥७॥

तथा सोपानसरणिः कर्तव्या कोमलैः पदैः ।
मया तु रचिता काचि त्सदारंभैकसूचिका ॥ ॥८॥

सर्वारंभो हि दोषेणे त्यादिन्याया दसौ कृतिः ।
सदोषा यद्यपि भवेदथा प्यत्र बुधो जनः ॥ ॥९॥

दोषा न्निरस्य विरलान् गुणान् दृष्ट्वा प्रमोदताम् ।
इत्थ मेतद्ग्रंथकर्त्रा सादरं विनिवेद्यते ॥ ॥१०॥

से. कृ. ति.

कथानां सूची.

कथा संख्या.		पुट संख्या.
१	उद्योगिता.	१
२	लुब्धता.	२
३	उचितःक्रमः.	२
४	असमीक्ष्यकारिता.	३
५	प्रेक्षाशून्यता.	३
६	वैद्यरोगिणोः कथा.	४
७	सारङ्गस्य कथा.	५
८	मृगपोतवृकयोः कथा.	६
९	मेषपोत वृकयोः कथा.	६
१०	सिंहजाबालयोः कथा.	७
११	ऐकमत्यम्.	८
१२	व्याधस्य कथा.	९
१३	जंबुकस्य कथा.	१०
१४	दीपस्य कथा.	११
१५	भेकयोः कथा.	११
१६	श्वशौल्बिकयोः कथा.	१२
१७	शुनकस्य कथा.	१२
१८	गजस्याभिज्ञता.	१३
१९	सिंहमूषकयोः कथा.	१४

कथा संख्या.		पुट संख्या.
२०	गृध्रसर्पयोः कथा.	१५
२१	सिंही कथा.	१६
२२	सिंहमक्षिकयोः कथा.	१७
२३	सिंहपुरुषयोः कथा.	१८
२४	विचित्रः परिहासः.	१९
२५	पण्डितनाविकयोः कथा.	२१
२६	चोरस्य कथा.	२२
२७	भ्रात्रोः कथा.	२२
२८	जामातुः कथा.	२३
२९	भ्रान्तस्य कथा.	२४
३०	सन्तुष्टचित्तता.	२५
३१	जलभीतस्य कथा.	२६
३२	समुद्रयायिनः कथा.	२७
३३	अपूपविक्रयिणः कथा.	२८
३४	षंडीभर्तुः कथा.	२८
३५	अज्ञप्रभोः कथा.	२९
३६	अगुरुदाहकस्य कथा.	३०
३७	तूलदाहकस्य कथा.	३१
३८	ओदनवप्तुः कथा.	३३
३९	श्रेष्ठि पुत्रस्य कथा.	३४
४०	वणिजस्तद्भृत्यानांच कथा.	३५

४१	मनसोऽनवधानम्.	....	३७
४२	मूषक कन्यायाः कथा.	....	३८
४३	लुब्धस्य कथा.	....	४०
४४	चटकयोः कथा.	....	४१
४५	तत्त्वविदः कथा.	....	४३
४६	क्षपणकस्य कथा.	....	४४
४७	यतिनः कथा.	....	४५
४८	ब्राह्मणपुत्रस्य कथा.	....	४७
४९	कदर्यस्य कथा.	....	४९
५०	अविवेकिता.	....	५२
५१	श्रेष्ठिनः कथा.	....	५४
५२	श्रेष्ठितुरुष्कयोः कथा.	....	५६
५३	अधमर्णस्य कथा.	....	५७
५४	आपणिकस्य कथा.	....	६०
५५	वणिग्भिक्षुकयोः कथा.	....	६२
५६	कलहकारिता.	....	६४
५७	औचित्यानभिज्ञता.	....	६७
५८	राजभृत्यस्य कथा.	....	६९
५९	भाषानभिज्ञता.	....	७०
६०	तापसस्य कथा.	....	७२

॥ श्रीः ॥

Bangalore:
6th May 1911.

I have had portions of Pandit M. K. Tirunarayana Aiyangar's Katharatnâkara Part I read to me, and am glad to be able to state that, as a book of easy moral lessons, it appears to be well suited to be placed in the hands of beginners trying to learn the Sanskrit Language. The language of the book is simple enough, and the stories are progressively graded. I hope it will be largely taken advantage of by those for whose benefit it is intended.

(Sd) M. RANGACHAR,
Professor of Sanskrit &
Comparative Philology
Presidency College
Madras.

७ म. हर्याचार्यः	चामराजेंद्र संस्कृत महा
८ शंकरशास्त्री	पाठशालाध्यक्षः मवीनं
९ मै. नेरूरु कृष्णाचार्यः	रामानुजाचार्यः.

५८ राजभृत्यस्य कथा. ६९
५९ भाषानभिज्ञता. ७०
६० तापसस्य कथा. ७२

॥ श्रीः ॥

मङ्गलपुरीमध्यविद्योतमान-श्रीचामराजेन्द्र-संस्कृत-महापाठशालाध्यक्षेणात्रत्यपण्डितैश्च विश्राणितेयं गुणद्योतनपत्रिका ।

यदुशैलपंडितश्रीकृष्णकुमारतिरुनारणैय्यङ्गार्यगुंफितं कथारत्नाकराख्यं वर्णकं षष्टिकथागर्भितं यथास्वं वरीवर्ति समीचीनम्॥ तत्तद्विद्यानिलयेषु व्यासंगिनां बालानां भागश उपकारकमद इत्यत्र न विद्यते द्वापरः। न खलु जगतीह बहुभाषाऽपि लेखकः प्रमादासङ्गं न भवतीति नातिचित्रम्। सत्यप्येवंप्रायोऽत्र नानवधानभावः। इदमिदानीं संख्यावद्भिराकलनीयम्। चतुरश्चतुरोऽपि निपुणमन्विष्यन् स्तोकलेखकान्न लभेतेति लेखनमिदं प्रति प्रमोदामहे।

१ वि. वेंकटरमणाचार्यः	नयनगुणवार्धिंदु मितसौम्य
२ नु. वि. तिरुमलाचार्यः	हायने मीन शुक्लपंचमी
३ विश्वेश्वरशास्त्री	सौम्यवासरः.
४ का. नरसिंहशास्त्री	श्रीः १९१० मार्च १६
५ मुत्या. शेषाचार्यः	श्री महीशूर महाराज धर्माधि
६ सीतारामशास्त्री	कारी, श्री मंगलनगरी श्री
७ म. हर्याचार्यः	चामराजेंद्र संस्कृत महा
८ शंकरशास्त्री	पाठशालाध्यक्षः नवीनं
९ वै. नेरूरु कृष्णाचार्यः	रामानुजाचार्यः.

श्रीः.

श्री विद्वद्वर्येण मे. कृ. तिरुनारायणय्यंगार्येण रचितोऽय मभिनवः कथारत्नाकरनामको ग्रंथसंदर्भ स्संस्कृतभाषाव्युत्पित्सूना मतीवोपकारक स्सुकुमारपदरचनया झडिंत्यर्थप्रत्यायकोऽवश्यज्ञातव्यानेक नीतिमार्गानुगुणार्थसौंदर्यसहित स्सकलजनमनोविनोदहेतुश्चेत्यावेदयति यादवगिरि (मेलुकोटे) संस्कृतकालीज् अध्यक्षः

सौम्य सं। फाल्गुन } पंडितरत्नं कुप्पण्णैंगार्यः
मास्यष्टम्यां भानुवासरे } मेलुकोटे.

Anandäsramam,
Chamaraj Mohalla,
Mysore, 3 April 1910.

Dear Sir,

I beg to acknowledge with thanks a copy of your compilation, 'Kathä Ratnäkara' and have much pleasure in certifying that in my opinion, the series of simple fables in easy sanskrit is well-calculated to help students of that language in acquiring a correct knowledge of it. Having been a student yourself, and having taught students for so many years, you seem to me to have correctly realized the difficulties of beginners, and to lead them gradually and almost imperceptibly through the mazes of Sanskrit Grammar, and idiomatic construction.

You are addmittedly only a translator: the fables are not yours. There are here and there permutations & tenses, especially of verbs, which appear to me rather forced and artificial. I think I had pointed out some of these to you in person, when I glanced over the parts as issued from the press.

But on the whole, I have no hesitation in saying, as I believe, that your work is a laudable and successful attempt to lighten the labours and smoothen the difficulties of the sanskrit student in the earlier stages.

I sincerely trust your book will be introduced into the Sanskrit Schools in and out of our country.

I remain, Dear Sir,
Yours truly,
(Sd.) V. N. Narasimmiyengar.

BANGALORE,
21—3—1910.

We have much pleasure in recommending the Katháratnákara of Pandit M. K. Tirunaraniengar to the Sanskrit students of the Middle and High School Standards. The author has taken much pains to make the lessons of the Series suitable for the several Forms for which they are intended. The style is simple, as it should be, and is specially instructive as exemplifying the grammatical rules of *Sandhi*, *Samasa* &c.

It is hoped that the work will be liberally patronised by the school-going population.

1. R. Narasimhachar M. A., M. R. A. S.,
Officer in charge of
Archæological Researches
in Mysore.

2. M. T. Narasimhiengar B.A., M R. A S.,
Sanskrit Lecturer,
Central College,
Bangalore.

3. M. T. Naraniengar M. A.,
Professor of Mathematics,
Central College,
Bangalore.

Prose works are very rare in Sanskrit Literature. Katháratnákara, a collection of instructive and interesting stories, therefore supplise a real want. Its author Bramhasri Vidwán M.K. Tirunarana-Iyengar who was a Sanskrit teacher in the Central College Bangalore for more than ten years, and who is now a Sanskrit Pandit in the Government High School Bangalore has made his work best suited for the High School classes. Rules of Sandhi and rules on the formation of compounds are properly illustrated in his book. The book also contains a number of well-chosen nominal and verbal derivatives.

* * * * *

D. SRINIVASCHAR M. A.,
Assistant Master,
Govt. High School,
Bangalore.

1st April 10.

शोधन पत्रम्.

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
१	१४	भिस्व	पर्यैरेव
६	७	विहनिश्च	विहीनश्च
	१४	वेनेन	वेगेन
	१०	मृयेय	म्रियेय
८	१२	तवि	तीव
९	३	न्यादि	त्यादि
	४	मङ्तुं	भङ्क्तुं
१०	१	प्रणोद्य	प्रणुद्य
११	१	शक्नोषीत्येव	शक्नोषि' इति । एव
११	१४	इति	इति, इति
	१७	त्पल्कले	त्पल्वले
१२	१४	स्त्वस्या	स्वस्या
१४	१९	मूषक	मूषका
१५	१९	मपनोद्य	मपनुद्य
	६	तमेवेति	स एवेति
१६	५	अह	आह
१७	४	बहुनां	बहूनां
	१३	निप्कंटक	निष्कंटक
	१५	मुञ्चन्ती	मुञ्चती

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
१८	२	आसति	आसीत्
	७	निष्पन्दा	निस्पन्दा
२०	९	विवौ	विमौ
	११	कलहेव	कलहेच
२१	२	प्रवीण	प्रवीणः
२६	१४	स्सेवदत्	स्सोवदत्
३०	१	कामयमाना	कामयमानो
३१	११	ष्लगुरु	ष्यगुरु
	१८	श्रेष्टि	श्रेष्ठि
३२	१	वणिज	वणिजे
	१८	भावे	भवे
३४	१२	मिषः	मिषुः
	१३	यावदह	यावदहं
३८	९	स्मात्म	स्वात्म
४०	१	यव	त्येव
४१	९	द्विषये	विषये
	१५	स्थित	स्थितः
४२	११	सति	सीत्
४३	४	पश्यति	पश्यतिं
४४	१	निडस्थाः	नीडस्थाः

पटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
४४	९	स्तोष्णीं	स्तूष्णीं
	१७	ञ्छुत्वा	च्छ्रुत्वा
४५	१	चकमे	चक्रमे
४७	१	मिज्ञान	भिज्ञान
४८	९	बालल्य	बालस्य
५०	१९	विन	विना
५२	४	कवल	केवल
	७	सन	सेन
५६	७	गन	गज
५७	३	स्थित	स्थितं
५९	२	मयान्तीं	मायान्तीं
		सदीपा	सदीपां
६१	१८	सतुष्ट	संतुष्टः
६३	४	काचि	कांचि
	१८	भिकुका	भिक्षुका
६४	१६	कचि	कंचि
६६	४	कि	किं
६९	९	दधत	दधतं
७०	५	निर्विण्णोय	निर्विण्णोर्य

श्रीः.

श्रीमते हयग्रीवाय नमः.

॥ कथारत्नाकरः ॥

प्रथमः कल्लोलः.

ध्यात्वा देवं हयग्रीवं रचयामि कुतूहलात् ॥
बालाना मुपकाराय कथारत्नाकरं नवम् ॥१॥

कथा १–उद्योगिता.

उद्योगिनं पुरुषसिंह मुपैति लक्ष्मीः.

पुण्यस्थले नामाऽग्रहारे कश्चि द्ब्राह्मण उवास । तस्य द्वौ पुत्रा वास्ताम् । तयो रतीव तन्द्रालु रेकः पित्रा मात्रा भ्रात्राऽन्येन वा प्युक्तं स्वीयमपि कार्यङ्कर्तुं सर्वदैव निरुद्योग आसीत् । अपर स्त्वन्यै रप्रेरितोऽपि स्वीयमिव परकीयमपि कार्यङ्कुर्वन् स्सर्वत्र कार्येऽतीव कुशलोऽभवत् । एवं स्थिते कतिभिरेव संवत्सरैः पितरि स्वीयन्धन म्पुत्राभ्यां विभज्य पुण्यतीर्थयात्राङ्गते निरुद्योगः पुत्रस्तन्द्रालुतया पित्र्यन्धनं व्ययित्वा जीविका मलभमानोऽवासीदत् । उद्योगवान्पुत्रस्तु स्वीयेन कौशलेन संपादित म्महद्धनम्पित्र्येण धनेन साकं संयोज्य महतीं समृद्धिमवाप, सुखी चाभवत्–अत स्सर्वोऽप्युद्योगी भवेत्.

कथा २–लुब्धता.

अगाधे ह्रदे निपतित मेकं सुवर्णस्य कटकन्दृष्ट्वा मोहितः कश्चित्पुरुष स्तदादातु मिच्छञ्जला द्भीतो ह्रद मवतरितु मपारयन् "का नोहानिः, ह्रदस्थं सर्वञ्जल म्पीत्वा ह्रदं स्थलं विधाय तत स्सुवर्णस्यकटक मुपलभै" इति मनसि सङ्कल्प्य जलम्पातु मारभ्योदरे पूर्णे स्फुटित पार्श्व स्सद्यः पञ्चता माप। अतोऽसाध्य ङ्कर्म नारभेत प्राज्ञः.

कथा ३–उचितःक्रमः.

दैवात्सङ्गीते जातपरिचयः कश्चिद्धीवर स्सदैव यत्किञ्चि द्गायन्नेकदा जालं वीणा ञ्चादाय समुद्रतीरङ्गत्वा तत्र तीरे जाल म्प्रसार्य स्वगीतिमाधुर्येणाऽऽकृष्टा मत्स्या नृत्यन्तो जाल म्प्रविशन्तीति मत्वा वीणां वादय न्मधुर ङ्गातु मारेभे। सुचिर ङ्गीतानि गायत्यपि तस्मि न्नैकोऽपि मत्स्यो जालं विवेश। किन्तु तद्गीतध्वने र्भीता स्सर्वेऽपि दूरदूर म्पलायन्त। सुदीर्घ ङ्गानेन श्रान्तो धीवरो जालं शून्य न्दृष्ट्वा वीणा मधो निवेश्यगीताद्विरतो जाल ञ्जले प्रसार्य यावत्प्रतीक्षते तावन्मत्स्या स्सङ्घशो जालमविशन्। कुत्रेण्यां पूर्णाया न्धीवरो गृहं ययौ.

एवं सर्वस्य स्वकार्यस्य करणे समुचितः क्रमो ज्ञेयोऽनुष्ठेयश्च.

कथा ४–असमीक्ष्यकारिता.

धनार्जनेच्छया ग्रामान्नगरङ्गच्छ न्कश्चिन्निर्धनो दैवान्मार्गे च्युताङ्कस्याऽपि सार्धवाहस्य भस्त्रिका म्पश्यंस्ता ङ्गृहीत्वा यावदुन्मुच्यान्त रवलोकयति तावत्तां हेमनाणकैःपूर्णा मपश्यत्। दैवेन दत्ता न्ताङ्गृहीत्वा कुत्राप्यन्यत्राऽगच्छ न्समूढ स्तत्रैव तानि नाणकानि गणयितु मारेभे। अत्रान्तरे प्रच्युताम्भस्त्रिकां स्मृत्वा हयमारुह्य क्षणागत स्सार्धवाहो हृष्टस्याऽस्य हस्ता त्स्वांहेमभास्त्रिका माच्छिद्याऽग्रहीत्। तत स्स निर्धनो दृष्टनष्टार्थः कर्तव्य मजान न्नधोमुखः प्रायात्। अत इदं स्मर्तव्यम्। लोकेऽस्मिञ्जन्तुना भाव्यं सर्वदा कृतबुद्धिनेति.

कथा ५–प्रेक्षाशून्यता.

शूद्रः कश्चित्स्वपुत्रेण साकङ्ग्रामान्तर म्प्रस्थितो मार्गे कञ्चित्सार्धं वीक्ष्य तेन सार्ध ङ्गच्छन्नासीत्। तस्मिन् सार्धे विश्रमाय कस्य चित्तरो रधस्ता दुपविशति, स पुत्रः क्रीडार्थं सार्धा द्बहिर्गतो वने ऋक्षैः कैश्चि दाक्रम्य पाटितदेहो दैवा ज्जीवन्कृच्छ्रा त्पलायितः पितर मुपेत्य-र्क्षानभिज्ञः "आर्य वनेस्मिन्फलभक्षिभिः कैश्चि ल्लोमशैः पाटितोऽस्मि" इत्यवदत्। तदाकर्ण्य क्रोधाकुल स्तत्पिता

तद्वनङ्गत्वा फलान्याददाना ञ्जटिलां स्तापसा नालोक्यै भिरेव लोमशै र्मे पुत्रः पातितोऽभूदित्यवधार्य तान् हन्तु मारेभे । तावद्वक्षै स्ते पुत्रः पातितो मया दृष्टो न त्व मीभि र्मुनिभि रतो मावधीरिमान्मुनीनिति केन चित्पान्थेन निवारितोऽप्यन्दिष्टच्या मुनिवधपातका दुत्तारित स्सार्थ माययौ । अतः, अप्रेक्षापूर्वकारी तु निन्द्यतेऽ वद्यकृत् क्षणादि त्युच्यते ।

वैद्यरोगिणोः कथा–६.

कुर्वं स्त्वविधिना कर्म विरोधि फल मश्नुते–यथा.

बातरोगेण पीडितः कश्चि त्कञ्चि द्भिषज मेत्य स्वस्य रोगमापेद्य तस्मिञ्चिद्भेषजं ययाचे । भिषक्च वस्त्यर्थ ङ्किञ्चि- दौषध न्तस्य हस्ते दत्वा,गृह ङ्गत्वैतत्पेषय,यावदहंभोजन न्निर्वर्त्याऽऽगच्छामीत्युक्त्वा गृहङ्गतो यावत्किञ्चिच्चिरयति तावत्समूढ स्तदौषध म्पिष्ट्वा वारिणाऽ पिबत् । तेनोत्पन्न- व्यापद न्तम्बुध्वा क्षणागतो भिषग्वमनाय किञ्चि दौषध न्दत्वा मृतकल्प मेनङ्कृच्छ्रादजीवयत् । अब्रवीच्च "रे जाल्म! वस्त्यौषधं गुदे दीयते न तु मुखे पीयते, किमित्यहन्न प्रतीक्षित स्त्वया, दैवा ज्जीवितोऽसि याहि" इति.

अतो विध्यनुगुण ङ्कर्म कार्यम्.

सारङ्गस्य कथा–७.

निदाघे महतोष्मणा सन्तप्ततनुः कश्चि त्सारङ्गो जल म्पातुङ्काञ्चिन्नदी मासाद्य जल म्पिबन्नेव स्वस्य शृङ्गयोः प्रतिच्छाया ञ्जले दृष्ट्वा "अहो कियतीश्वरस्य वस्तुनिर्मा णचातुरी, शाखोपशाखतया सुसमृद्धे मे शृङ्गे कियतीमिव मे सौन्दर्यशोभा मापादयतः" इत्येव ञ्चिन्तयन्पुनरपि जले स्वपादाना म्प्रातिफल मालोक्य 'किं मेव म्भगवता मम पादेषु वैरूप्य मुत्पादितम्, हन्त! एव मतिकृशैः पादैर्युक्तस्य मे जीवितमेव लज्जाकर म्मन्ये' इति शोचं स्तत्क्षणा देवाऽदूरोत्पन्नं सिंहस्य नादं श्रुत्वा महता वेगेन पलायमान स्सिंहस्यागम्य न्देशङ्गत स्तत्रापि सिंहागमन मुत्प्रेक्षमाणः पलायमान एव कुत्र चिद्गुल्मे लग्नविषाणो बहुशाखतया लघु मोचयितु मशक्नुवन् 'मम जीवितस्यापि लज्जाकरैः कृशैः पादै रेतावन्त न्देश मागतवानह म्ममैव हर्षहेतुभ्यां शृङ्गाभ्या मेव निरुद्धोऽ स्मि' इति चिन्तयितु मपि काल मलभमान स्त्वरितागतेन सिंहेन गृहीतो व्यापादितश्च । अतो देवेना स्मभ्यं यद्य द्दत्तं तत्सर्व मस्मद्धितायैवेति संतुष्टेन भाव्यम्.

मृगपोतवृकयोः कथा-८

मृगपोतः कश्चित् स्वयूथात्परिभ्रष्टो रक्षाविहीनश्चा रण्ये भ्रमन्नकस्मादागतेन केनचिद्वृकेण हठा द्गृहीतो मार्गान्तर मपश्य न्वृकं सम्बोध्य, "भो वृकराज! जाने तव भक्ष्योहमिति, मर्तव्यमेव मया त्वत्त इतिच, किन्तु प्रार्थये भवन्त ङ्कञ्चि दर्थम् । भवदनुग्रहाल्लब्धेन येन सहर्षएव मृयेय" इति । वृकोऽ वदत् । 'क एषोऽर्थो येनत्वन्तुष्यासि' इति । तदाकर्ण्य मृगपोतः प्रत्यवदत् । 'त्वं वेणुमादाय कञ्चि त्कालं नादयेश्चे दह न्तदनुगुणन्नर्तित्वा नृत्यरसास्वादेन भवन्तम्माञ्चानन्दयित्वा मृयेय' इति । वृक स्तथेत्युक्त्वा वेणुमादाय यावन्नादयति, तावद्वेणुनादं श्रुत्वा गोपाल धिया तत्रागतान् शुनो दृष्ट्वा भीतोऽयं वृकस्समये स्वोचित ङ्कार्यमकृत्वा वेणुनादनप्रवृत्तोऽह महीम्ये वैतस्य फलस्य भाजन म्भवितुमिति वदन्नेव महता वेगेन पला यितः कुत्रा प्यदर्शन ङ्गतः । मृगोपि स्वीयं यूथ ङ्गन स्सुखेना वर्तत । एव म्प्रबला द्विरोधिनो दीना उपायेना त्मानं रक्षन्ति.

मेषपोतवृकयोः कथा-९.

मेषपोत ङ्कञ्चि त्स्वयूथा त्परिभ्रष्ट मासाद्य केनापि

व्याजेन तं भक्षयितु मिच्छ न्क श्चिद्वृकः, 'रे मेषपोत, किमिति परारि मा मतिमात्र ङ्गर्हितवानसि त्व' मित्यपृ च्छत् । 'तदा नैवाह मुत्पन्नो भव' मिति तेनो त्तरिते स वृकः, 'मास्तु तर्हि, कस्मा त्परुन्मम क्षेत्रे तृणानि चरितवानसी' त्याक्षिक्षेप, 'नापि तदाऽहन्तृणखा दनयोग्या न्दशा मापन्नो भव' मित्युक्तवति मेषपोते, 'मा स्तुनाम तदपि तर्हि, किमित्यैषमो मम नद्या जलं पीत वानसी'ति वृकोभृशं चुक्रोश, तच्छ्रुत्वा 'आरा मम सर्वो प्याहारः पानञ्च मम मातु स्स्तन्यमेवासीत्' इति सभय मुक्तवन्त न्तं सम्बोध्य, 'रे जाल्म! अस्तु नाम यः कोपि परिहारो मदुक्तेः । तथापि नाह माहारं विना वर्तितु मुत्सहे' इति वदन्नेव त ङ्गृहीत्वा भक्षयामास । एवं क्रूरा बलिन स्स्वक्रौर्यप्रकाशने यत्किञ्चिदपि हेतुं परि कल्पयन्ति.

सिंहजाबालयोः कथा-१०.

जाबालः कश्चिदरण्येऽजां श्चारयन्नासीत् । कुत्रापि कण्टकिते मार्गे चरित्वा पादे लग्नकण्टकः कश्चित्सिंह स्तं समासाद्य 'त्वां शरणं गतोस्मि, त्वदीयं साहाय्यं प्रार्थये,' इति विवक्षयेव लाङ्गूल ञ्चलयं स्तस्याग्रे सकण्टकं पादं प्रसार्यातिष्ठत् । तन्दृष्ट्वा प्रथमं भीतोऽसौ जाबालो निपुण

न्निरूप्याऽग्रतः प्रसारिते तस्य पादे कञ्चि त्कण्टक
मालोक्य तत्कृतां वेदना मभ्यूह्य स्वहस्तेन कण्टक
मुत्पाट्य तं सुखित मतनोत् । एवङ्गतवेदनो मृगराजो
निवृत्यारण्यङ्गतो व्याधैः प्रसारिते जाले पतितो राजगृह
मनीयत । राजाऽपि कुतुका त्त मेकस्मिन्पञ्जरे स्थाप
यामास । कस्मा च्चित्काला त्परञ्जाबाल मेन ग्मिथ्या
भूतेनाऽपराधेना भिशासन्दण्डयन् राजा सिंहाविदार्य मेन
मादिदेश । पंजरनिबद्धस्य सिंहस्याग्रे यदा भृत्या एन
मानिन्युः, तदा स सिंह स्त मेनं स्वस्योपकृतवन्तं प्रत्य
भिज्ञाय त महिंसित्वा तस्मिन्स्वस्य कृतज्ञताप्रकाश
नायेव तस्याङ्के सुखं निषण्ण स्तं मृदु चुचुम्ब । एतद्दृष्ट्वा
भृत्यैराज्ञे निवेदिते वृत्तान्ते, राजाऽतीव विस्मयाकुलः
पञ्जरा त्सिंहन्दण्डभीतेः पुरुषञ्च मोचयामास । एवङ्कृत
मुपकारान्तिर्यञ्चोऽपि जानन्ति.

ऐकमत्यम् कथा–११.

कस्मिंश्चि दग्रहारे कश्चि त्पुरुषोऽवर्तत, केनचित्का
लेन तस्य पञ्च पुत्रा अजायन्त । ते चाऽऽबाल्या त्परस्परं
सौहार्द मप्रकाश्य केनाऽपि हेतुना सदैव कलहायमाना
आसन् । तानेता न्त्समाधातुं पिता बहुधा उपदिशन्नपि

यदा न किञ्चित्फल मपश्यत्, तदा स्वपुत्रा नाहूय तैः
पञ्चषा स्सूक्ष्मा यष्टी रानाय्य ता स्सर्वा अप्येकीकृत्य
बध्वा तं भारं पुत्राणामेकैकस्य हस्ते दत्वा भङ्क्षी न्यादि
देश । यदा एकैकोपि तं यष्टिभारं भङ्क्तुं नापारयत् । तदा
पिता त मादाय विस्रस्य प्रत्येक मेकैकां यष्टि मेकैकस्य हस्ते
दत्वे दानीं भङ्क्षी त्यादिदेश । एकैकेना प्यनायासेन
भग्नायां यष्ट्यां पिता ता नालोक्या वदत् । पश्यतेदानीं,
यदा यष्टय स्संमिलिता स्तदाता नैव युष्मास्वेकेनाप्यभ
ज्यन्त, प्रत्येक मेकैका तु यष्टि स्सुखेनाभज्यत । एवमेव
भवंतोऽपि यदा सम्मिलिता एकाभिप्राया श्च वर्तंते, तदा
परै र्दुर्जया भवन्ति । यदा तु परस्परं कलहं कुर्वंतः प्रत्येकं
वर्तंते, तदा परेषां सुखोच्छेद्या भवन्ति । अतो युष्माभि
रितःप्रभृति सदैव सम्मिलितै र्भाव्य मिति । अत एवेद
मुच्यते 'सङ्घेशक्तिस्तु भूयसी' इति.

व्याधस्य कथा–१२.

महारण्ये कुत्र चिज्जाल म्प्रसार्य महता श्रमेणैकं
शश ङ्गृहीत्वा तद्गृह मानयन् कश्चि द्व्याधो मार्गे कश्चि
त्पुरुष मश्वारूढ मपश्यत् । स च तं विक्रेष्यन्निव व्याधस्य
हस्तादादाय तस्य सर्वतोऽङ्गानि परिकलयन्निव तस्य

मूल्यं पृच्छन्नेवाश्वं पादेन प्रणोद्य महता वेगेनाधावयत्। व्याधोऽपि तमनुसृत्य कञ्चिदध्वानङ्गत्वा प्रवृद्धे च तयो रन्तरे त द्गृहीतु मपारयं स्तं सम्बोध्य भोयश्वसादिन् गृह्यता मयं शशको भवतएव यतोऽय स्मया तुभ्यं पारितोषकीकृतः इत्युच्चैस्स्वरेण क्रोशन्नेव विफलायास स्तूष्णी गृहं ययौ। एवं हृतस्य प्रत्याहरणे शक्तया हिना अपि जनास्स्वासामर्थ्यं न प्रकाशयन्ति.

जंबुकस्य कथा–१३.

ऋद्धिं प्राप्तो ह्यधर्मेण भया त्क्लेशा च्च सीदति, यथा.

क्षुत्क्षामकण्ठः कश्चि ज्जंबुकः कुत्र चिद्ग्रामप्रान्ते कस्य चिद्वृक्षस्य कोटरे केनापि जाबालेन स्वाहारार्थ न्निहित मामिष न्दृष्ट्वा कथञ्चि त्कोटराभ्यन्तरं प्रविष्टो महता हर्षेण तद्भक्षयितु मारेभे. निरर्गल मशितेन सक लेन तेना हारेण स तथा पूर्णो भवत् यथा कोटरा द्बहि र्निर्गन्तु मपिनाशक्नोत्। तदा महता शोकेन भयेन च प्रलपत स्तस्य दीन माक्रन्दं श्रुत्वा तेन मार्गेणाऽऽगच्छ न्नन्यो जंबुक स्तत्रागत्या क्रन्दनस्य कारण मपृच्छत्। निवेदिते च सकल एव वृत्तान्ते द्वितीयो जंबुकःप्रथम मव दत् 'सखे ताव द्भवता त्र स्थातव्यं यावता त्वं तथा कृशो भविष्यसि, यथा त्र प्रविष्टवा नसि, तदैव केवलं सुखेन

निर्गन्तुं शक्नोषीत्येव मुक्त्वा गते द्वितीये जंबूके तत्र कोटर आहार न्निहितवान्पुरुष स्समागत्याऽऽहारस्थाने पुष्ट मेकं जंबुकं दृष्ट्वाऽतीव क्रुद्ध स्तीव्रेण प्रहारेण त मताडयत्। एव मन्यायेना न्यदीयं वस्तु मुष्णतां गति श्शोच्याऽपह सनीया च भवति.

दीपस्य कथा–१४.

भूमिगृहे कुत्रचि त्तैलपूर्णे पात्रे समारोपितो दीप स्सूक्ष्मेणापि मरुता प्रचलन् प्रकाशदाने च सूर्यादप्यात्मान मधिकतरं मन्यमान स्तारका रत्नदीपिका श्च विशेषतः परिहस न्नासीत्। एवं स्थिते झडित्युत्पन्नो वायो स्सुसूक्ष्मः फूत्कार स्तं शमयामास। तद्दृष्ट्वा तत्स्वामी तं पुन रारोप्य त मेव मवदत्। मा स्मेतः परं कदापि विकत्थथाः जानीहि सुसूक्ष्मापि तारका न पुन रारोपण मपेक्षते नच विकत्थत इति. अल्पस्य माहिमा हीदृशः.

भेकयोः कथा–१५.

फलं भावि समालोच्य कार्यं कुर्या द्विचक्षणः.

गाधे कस्मिंश्चि त्पल्वले चिराय द्वौ भेकौ न्यवसताम्। निदाघ ऊष्मणा तज्जले शुष्यत्यतीव दुःखाकुलौ ता

कूर्मौ तत्पल्वलं विहाय यत्र कुत्राप्यन्यं जलाशयं विचि न्वन्तौ मार्गे कञ्चि दगाधं जलपूर्णं कूप मपश्यताम् । तयो रेकोऽवदत् अवतरावोऽत्र जलाशये, एष एवावयो श्शरणं भूत्वाऽऽहारमपि संपादयती ति । अन्यः प्रत्यवो चत् । विमृशतु भवान् प्रथमं यद्यत्रापि जलं शुष्येत्तदा कथ मावाभ्या मस्मा द्गभीरा त्कूपा द्बहि रागन्तव्यमिती ति।

अतः भावि फलं समालोच्य कार्यं कर्तव्यम्.

श्वशौल्बिकयोः कथा–१६.

सर्वे स्वार्थपरो लोके न कश्चि त्परचिन्तकः.

कस्य चिच्छौल्बिकस्य वशे कश्चि च्छुनक आसीत्। सदैवानुवर्तनशील स्स तस्या तीव प्रेमास्पदं सखा चाभवत्। परंतु यदा स शौल्बिको लोहघनेन ताम्रस्य घट्टनं कुर्व न्नासीत् तदा स शुनक स्तारेणापि तत्स्वनेना प्रबोधित स्सुखं शिश्ये । यदा पुन स्स स्वस्याऽऽहारादिकं गृहीतु गतोऽन्नादिकं जग्धु मारभत तदाऽयं सुसूक्ष्मेणापि तद्ध्वनिना झडित्येव प्रबोधित स्त मन्वधावत् । एवं स्वकार्यधुरीणा अन्यदीयं श्रमं नैव चिन्तयन्ति.

शुनकस्य कथा–१७.

कस्मिंश्चि न्नगरे कश्चि च्छूद्र आसीत् । तस्य वशे

स्थितः कश्चि च्छुनक स्स्वानुगुण ङ्कार्य मकुर्व स्तत्रतत्र सञ्चरन्मार्गेण तेन सञ्चरमाणाना ञ्जनाना म्पश्चादनुधाव्य तेषा मनवधानदशाया न्ता न्दशन्नाऽऽसीत् । शुनकस्यै-तादृशं स्वभाव म्परिवर्तयितुं बहू नुपाया न्कृत्वाऽपि विफलप्रयासोऽयं शूद्रो जनाना मेतदागमनसूचनायाऽस्य ग्रीवाया ङ्किङ्किणी मेका मबध्नात् । सोऽपि शुनक स्ताङ्किङ्किणी मात्मने कृत मलङ्कार म्मन्यमान स्ता न्तत्रतत्र विशेषतो ध्वनयं श्चरितु मारेभे । एव म्महता हर्षेणोन्मत्तायमान मेन न्दृष्ट्वाऽन्योवृद्ध श्श्वाऽवदत् । 'रे मूढ ! किमित्येवं सर्वदा किङ्किणीं ध्वनय न्प्रहृष्ट स्सञ्च रसि । जानीहि तव ग्रीवाया न्निबद्धेय ङ्किङ्किणी न तवो त्कर्षप्रकाशनाय विहितोऽलङ्कारः । किन्तु तद्वैपरीत्येन तव दौरात्म्य ञ्जनेभ्यः प्रकाश्य, तादृशस्य तव दूरीकर णाय कृतः कलङ्क इति' इति । युक्तश्चैतत् । यत इद मुच्यते । 'येनाऽपत्रपते साधु रसाधु स्तेन तुष्यति' इति.

गजस्याभिज्ञता कथा–१८.

प्रत्यहं वार्या आधोरणेन नगर न्नीयमानः कश्चि द्गजो मार्गे कञ्चन सेतुन्तरन्नाऽऽसीत् । एकस्मि न्दिन आधोरणो यथापूर्व ङ्गज मारुह्य तेनैव मार्गेण गन्तु

प्रस्थित स्सेतोरान्तिक मगच्छत् । अयञ्च गज श्शुण्डया सेतुं स्पृष्ट्वा तदुपरि नैकमपि पद न्निधातु मैच्छत् । आधोरणोऽपि गजस्याऽनिच्छां ज्ञात्वाऽपि तत्कारणमजानान स्तत्प्रवर्तनाय भूयोभूय स्त ङ्गज मङ्कुशेन तुतोद । तद्वेदना मसहमानो गज स्स्वय मनिच्छन्नपि याव त्पञ्चषाणि पदानि निधाय सेतो र्मध्य ङ्गच्छति, ताव त्सेतु र्भिद्यते स्म । गज आधोरण श्चेत्युभावपि नद्या मपतताम् । पतनमात्रादेवाऽऽधोरणो ममार । गजस्तु पूर्व मपाय माशङ्कितवानपि नद्यां पातेन पर मर्दितोऽभवत् । एवं तिरश्चा मपि मनुष्येभ्योऽभ्यधिकाऽभिज्ञता जागर्ति ।

सिंहमूषकयोः कथा—१९.

कस्मिंश्चि दरण्ये कश्चनसिंहः कुत्रचि द्गुहायां सुखेन सुप्त आसीत् । कश्चि न्मूषक स्तस्योपरि पतित्वा त म्प्राबोधयत् । प्रबुद्ध श्च सिंहो महता कोपेन तम्मूषक ङ्गृहीत्वा हन्तु मारभत । मूषकोऽपि तस्योद्यमं विदित्वा सविनयं सदैन्यञ्च तमेवं प्रार्थयत । 'भो मृगराज! यदि त्व म्मा महत्वा मम प्राणानूक्षसि, तदा तदुचितस्योपकारस्य करणेनाऽऽत्मान मनृण ङ्करिष्यामि' इति । तदाकर्ण्य सिंहो जातदयः किञ्चिदिव स्मित्वा 'किंमूषक

स्त्वत्तोऽपि मृगाधिपस्य ममोपकार स्संभाव्येत' इत्युक्त्वा त महिंसित्वा व्यसृजत् । अचिरा त्सएव सिंहः कुत्रचिदरण्ये व्याधैः प्रसारिते जाले पतितो महता प्रयासेना प्यात्मान म्मोचयितु मक्षमः केवलन्दीनेनाऽऽक्रन्दितेन क्रोशन्नाऽऽसीत् । तस्याऽऽक्रन्दितध्वनिं श्रुत्वा स्वरेण तमेवेति प्रत्यभिज्ञाय तत्रागत स्स मूषक स्सिंह ञ्जाले पतितं वीक्ष्य महता वेगेन तीक्ष्णै स्स्वदशनै र्जाल ङ्खण्डश श्छित्वा सिंहं मोचयामास; आहच, 'पूर्व म्मम वचन मवधीरितवान्भवा ञ्जानाति, मृगाधिपस्याऽपि ते मूषकेण मया साह्यं संभाव्यमिति' इति । एव मल्पानवमन्यमानाना म्महता न्नियतं तत्साह्यापेक्षिण्यवस्था संभवति, अतो महानल्प न्नावमन्येत ।

गृध्रसर्पयोः कथा—२०.

अरण्ये कुत्रचि देको गृध्रो भुजङ्गश्चेति द्वावपि परस्पर ङ्कलहायमाना वास्ताम् । अन्तत स्सर्प स्स्वभोगेन गृध्रमावेष्ट्य तं निश्चलमकरोत् । तेनैव मार्गेणाऽऽगच्छ न्कश्चि त्पान्थस्तदवस्थन्तङ्गृध्रं विलोक्य जातदय स्स्वभार ङ्कुत्रचि त्तत्रैव निवेश्य तत्सकाशङ्गत स्सर्पस्य वेष्टन मपनोद्य गृध्रं विमोचयामास । स्वशवो स्साह्यकरणेन पुरु

षाय कुध्य न्सर्प स्तस्मै द्रोग्धुं समीपनिक्षिप्ते पानीयपूर्णे पान्थस्य पात्रे तीव्रं विष मुद्गीर्य दूर ञ्जगाम। पुरुषोऽपि गृध्रं विमोच्य स्वभारोद्वहनात्पूर्वं पानीयपात्र मानीय याव ज्जलं पातु मारभत, तावदेवाऽऽकाशा दवरूढो गृध्रः पुरुषस्य हस्ता त्पात्रं स्खालयामास। अह च पुरुषन्तम् 'आर्य! सर्पस्य विषोद्गारेण दूषित ञ्जल न्न ते पानार्हम्। नैत द्भवाञ्जानाति, सर्पस्य दुश्शीलता ञ्जानता मया त्वत्तो लब्धोपकारेणेदं ङ्कृतम्। नैव त्वयाऽन्यथा भावनीयम्' इति। एतच्छ्रुत्वा संतुष्टे पान्थे याते सगृध्रोऽपि क्वाप्यदर्शनं ययौ। एव ङ्कृतोपकारा स्तिर्यञ्चोऽपि प्रत्युपकुर्वन्ति॥

सिंही कथा–२१.

अरण्ये कुत्रचि द्विमलाया श्चन्द्रिकायां सम्मिलितानां बहूना मारण्यकानां सत्वानां समभू त्कश्चि द्विवादः कावा तेषां म्मध्ये प्रसूता वेकस्यां बहून्यपत्यान्युत्पाद यति' इति। एवं विचारे प्रवृत्ता स्तेसर्वे विवादं निर्णेतुं स्वय मशक्नुवन्त स्तन्निर्णयाय निकटस्थितां ङ्कांचि त्सिंहीं मभ्येत्य पप्रच्छुः 'कावाऽस्मास्वपत्यै र्बहुभि कीर्तिमती' इति। साऽपि तेषां विवादम्वदं श्रुत्वा स्वय मेव न्तानवोचत्। "अपत्यवत्ताकीर्ति र्नाऽपत्यानां संख्याधिक्यनिबन्धना।

किन्तूत्पन्नाना मपत्याना मसाधारण शौर्यादिगुणनिबन्धना। अह मप्येकस्यां प्रसूता वेकमेव शिशुं सुवे। तच्चैकं शूरं सिंहम्। येनैकेनैवाऽहं निर्भया वने स्वपिमि। अतोऽशक्तानां बहूनां सुतानां वर्गादपि शक्तिमानेकः पुत्रो वरम्' इति। उच्यते च—

सहैव दशभिः पुत्रै र्भारं वहति गर्दभी।
एकेनाऽपि सुपुत्रेण सिंही स्वपिति निर्भया॥ इति।

सूते सूकरयुवति स्सुतशत मतिदुर्भगं झडिति।
करिणी चिराय सूते सकलमहीपाललालित ङ्कलभमितिच।

सिंहमक्षिकयोः कथा–२२.

अल्पभावेषु धीराणा मवज्ञैव हि शोभते.

कुत्राप्यरण्ये कश्चन मृगेन्द्र स्सर्वानेव मृगा न्स्ववीर्येण जित्वा निष्कण्टकमेव तद्वनराज्य ङ्कुर्वन्नासीत्। किन्तु तस्याऽऽहारभूतस्य रक्तमांसादे र्गन्धेनाऽऽकृष्टा काचि न्मक्षिका सदैव तत्पार्श्व ममुञ्चन्ती झङ्कारेण वनमाखिलं प्रपूर्य सिंहस्य महान्तं निद्राविघ्न मुत्पादयन्त्याऽऽसीत्। सिंहश्च तेन नितरां निर्विण्ण उपायान्तर मपश्य न्महता कोपेन तन्निष्कासनाय तीक्ष्णाग्रै र्नखै रुपेतेनाऽऽत्मपा-

णिना स्वमूर्धानं भूयोभूय स्ताडयं स्तत्प्रहारजनितेनाऽ स्रप्रवाहेण परां वेदना मनुभव न्नाऽऽसीत्, मक्षिका तु नैवाऽ पससार । एव ञ्जातपीडो मृगराजो महता निर्वेदेन तत् स्थानं मुक्त्वा प्रस्थितः कुत्रचिद्गुहायां शिश्ये । मक्षिका पि तमनुसरन्ती, केनाऽप्यप्रविष्टतया लूतातन्तुनिबि डाया न्तत्र गुहाया मेकस्मि ल्लूतातन्तुजाले पतिता तत्क्ष णागतेनोर्णनाभिना गृहीता बद्धा च निष्पन्दा निस्स्वना प्यभवत् । अचिन्तयच्च 'अहो! स्वप्रभावेण मृगराज मपि जितवत्यह मतिसूक्ष्मेणाऽनेन कीटेनैतादृशी न्दशा ङ्गमिताऽस्मि' इति । एवं क्षुद्र मपराधिनं दण्डयितुं तदपे क्षया क्षुद्रतरएव प्रभवति न तु महान्, महतस्तु तत्राऽवज्ञैव शोभते ।

सिंहपुरुषयोः कथा-२३.

कश्चि द्योधः प्रत्यहं शस्त्राभ्यासायाऽटवीङ्गच्छं स्तत्र स्थितेन केन चि त्सिंहेन दैवा न्मित्रता मगमत् । एकस्मि न्दिने द्वाविमौ तत्रतत्र सञ्चरन्तौ तयो रेकैकस्य बुद्धे श्शक्तेश्च प्रभावं प्रति कत्थमाना वास्ताम् । एवं विवद मानावेव तावुभौ किञ्चिद्दूर ङ्गत्वा कस्यचि द्ग्रामस्य निकटे कस्याञ्चिद्भित्तौ लिखित मालेख्य मपश्यताम् ।

तत्र सिंहेन सार्कं युद्धे सिंह मधो निपात्य तदुपरि स्थितस्य पुरुषस्याऽऽकृतिं लिखिता न्निर्दिश्य योधोऽ वदत् । "सखे मृगराज! अलमल मावयो र्विवादेन । पश्याऽत्र चित्रे मनुष्याणां पराक्रमः प्रकटो दृश्यते । येन मृगाधिप सिंहोऽपि मनुजेन पराभूतो वर्तते" इति । सिंहोऽवदत् 'महामते मित्र! आलेख्य मेत द्भवत्सजा तीयेन केनचि न्मनुष्येण विलिखितम् । यदि सिंहाना मपि चित्रलेखने कौशल मभविष्यत् । तदा सिंहानां पराक्रमोऽपि प्रकटोऽभविष्यत् । स्वात्मरक्षणक्षमा ङ्काय शक्ति मेव भगवां स्तिरश्चा न्निर्ममे । नतु मनुष्याणामिव परप्रतारणैकफलां वञ्चनाशक्तिमपि' इति । तच्छ्रुत्वा सयोधः परं लज्जितोऽभवत् । एव मेकस्यो पन्यासचातुरी तावदेव रम्या दृश्यते । याव दन्यस्य सा न श्रूयते ।

विचित्रः परिहासः कथा-२४.

स्वस्योद्याने विश्रमाय प्रासाद मेकं निर्मापयितु मिच्छ न्कश्चन प्रभु स्तन्निर्वहणाय तदभिज्ञ ङ्कञ्चित्पुरुषं प्रतिभुव मकल्पयत् । सच प्रतिभू र्बहू न्कर्मकरा न्दार्वादीनि वस्तूनि चाऽऽनाय्य ता न्स्वस्वकार्याणि कर्तु मादिश्य प्रासादार्थ मपेक्षिताना मन्येषां वस्तूनां संभाराय स्वयं

कुत्राप्यगमत् । प्रभुश्च प्रासादनिर्माण मालुलोकयिषुः कदाचि दुद्यानवाटिका माजगाम । तत्रैक स्तक्षक स्स्वेन क्रियमाणे दारुदारणे कञ्चि द्बालकं सहाय मकरोत् । दीर्यमाण न्दार्वतीव कठिन मासीत् । क्रकचश्च किञ्चि दतीक्ष्णोऽभवत् । अतो द्वाविमौ तक्षकबालकौ दारुणः पार्श्वयो र्मिथोऽभिमुखं स्थित्वा महता श्रमेण करपत्र सुदीर्घ ङ्कर्षन्तौ विकर्षन्तौचाऽऽस्ताम् । दारुदारणक्रम मितःपूर्वं कुत्राप्य दृष्टवा नयं प्रभुः सुदीर्घकालं दारुदारण-प्रवृत्ता विवौ दृष्ट्वा "अहो, नून मिमा वेकस्मै लोहफल काय कलहायेते । किन्त्वनयो रेको बालः, अपरस्तु युवा । एनयो र्मिथः कलहे त्र युवा बालं पराजयते । अतोऽद्याऽस्माभिर्बालायैव साह्यं कार्यम्" इति मनसि निश्चित्य महता वेगेन तन्तक्षक श्चपेटिकाघातेन विनिवर्त्य तद्धस्ता त्क्रकच माच्छिद्य, 'भोबाल! गृहाणेदं लोहफ लकम् । पलायस्वेदानी न्द्रुततरम् । अन्यथा दुरात्माऽयं पुनराहरे दिदम्' इत्यभिदधानः क्रकचं बालस्य हस्तेऽ ददात् । एत दृष्ट्वा तत्रस्था स्सर्वे कर्मकरा भीता स्स्वस्व कर्माणि विहाय पलायन्त । एवं तत्तद्व्यवहार मजानन्तोऽ ज्ञाः प्रभव स्स्वं स्वं प्रयोजनं स्वयमेव नाशयन्ति । अतः प्रभुभि र्लोकव्यवहारोऽवश्यं ज्ञेयः ।

पण्डितनाविकयोः कथा—२९.

सकलेषु शास्त्रेषु प्रवीण कश्चन पण्डितः कदाचि त्समुद्रवेलायां पर्यट न्समुद्रा न्नौकाया मायान्त ङ्कञ्चन नाविक मालोक्य कथ मय मेवं समुद्रे निर्भयं खेलतीति विस्मितो भूत्वा तीर मागत न्त मालोक्य 'भोमित्र! कुत्र ते पिताऽम्रियत' इत्यपृच्छत् । तदाकर्ण्य स नाविकः 'मम पिता, पितामहः, प्रपितामहः, ततः पूर्वे पुरुषाश्च समुद्र ङ्गता स्तत्रैव ममज्जुः' इत्युत्तरं ददौ । 'सर्वां स्ते पूर्वपुरुषान् समुद्रे मग्नान् ज्ञात्वाऽपि कथं त्व मिदानी न्निर्भयं समुद्र ङ्गच्छसि' इति पण्डिते पुनः पृच्छति, सनाविकोऽवदत् । 'प्रसीदतु भवान्, कुत्र कथंवा तव पूर्वपुरुषा अम्रियन्तेति कथयतु' इति । 'सर्वे मे पूर्वपुरुषा भवने स्थिताएव शय्यायां शयिता अम्रियन्त' इति पण्डितोऽवदत् । तदाकर्ण्य नाविकः 'शय्यायां शयने, मे पूर्वपुरुषव दहमपि म्रियेयेति पण्डिते त्वय्येवाऽबिभ्यति किमिति मया नाविकेन भेतव्यं समुद्रगमनेऽहमपि सज्जे यमिति' इत्यवदत् । एतदाकर्ण्य किमप्युत्तर मप्रतिपद्य मानः पंडित स्तूर्षीं लज्जितो जगाम । एवं प्राज्ञा अपि मूढैः कदाचि त्परिभूयन्ते ।

चोरस्य कथा–२६.

चिराय चौर्येण जीवन ङ्कुर्व न्कश्चि चोरः कस्यचि द्गृहे मोषणाय समयं प्रतीक्षमाण एकस्यां रात्रौ निशीथे तद्गृहं प्रविश्य सर्वा न्सुप्ता न्विज्ञायाऽन्तः प्रविष्ट स्तत्रतत्र मृगयमाणः कुत्रचि त्कोणे पिधाय निहित ङ्कञ्चि त्पिटक मपश्यत्। तत स्तत्सकाश ङ्गत स्तदन्तस्स्थित मपजिहीर्षु रनुद्घाट्यैव पिधानं शनैः पिटके हस्तं प्रसारयामास। मूषकग्रहणोद्देशेन दिनद्वया दर्वा गाहार मप्य दत्वा तत्र पिटके निरुद्धः कश्चि न्मार्जालोऽतीव क्षुधितः क्रुद्धश्च प्रसारितं हस्तं मूषक म्मत्वा नखै र्विदार्य दन्तै स्सुतीव्र मदशत्। तज्जन्यां वेदना मसहमानोऽयं चोर स्स्वव्यापारभूतं मौनमपि विस्मृत्य तारस्वरेण चुक्रोश। तेन शब्देन प्रबुद्धा स्सर्वे गृहजना स्तं चोरं विदित्वा सम्यक्प्राहरन्। एव मकार्यकारी दैवेनैव दंड्यते अतो नाकार्यं कुर्वीत।

भ्रात्रोः कथा–२७.

द्वौ लोकौ नाशयत्येव मूर्खो मूर्खोपदेशतः.

ग्रामेकास्मिंश्चि द्वौ भ्रातरावास्ताम्। पित्र्यस्य महतो धनस्य विभागे न्यूनाधिकविवादिनौ तौ काञ्चिदुपाध्यायं छान्दसं

स्थेयमकुर्वाताम्। सोऽपि च्छान्दसः "एकैकं वस्तु द्विधा कृत्वा भवद्भ्या मेकैकोंऽशो गृह्यताम्। येन न्यूनाधिक कृतो विवादो नैवोद्भवे द्भवतोः" इत्यवोचत। तच्छ्रुत्वा ताविमौ मूढौ भ्रातरौ तदुक्तरीत्यैव क्षेत्रे, वेश्मनि, शय्यायां, भाण्डेषु, भूषणेषु, रत्नेषु, वस्त्रेषु, पशुषु चेत्ये वमादिषु सकलेषु वस्तुष्वप्येकैकं द्वेधा भङ्क्त्वा विभज्यैकैकोऽप्येकैकं भाग मगृह्णात्। किञ्च तयो रेका दासी समवर्तत। ताञ्च यदा तौ द्विधा कृतवन्तौ, तदा, तत्रत्या जना वृतान्त मिमं राज्ञे न्यवेदयन्। राजाऽपि श्रुतवृतान्त स्तावानाय्य विचार्य तौ सर्वस्व मदण्डयत्। एव मिह राजदण्डेनाऽमुष्मिल्लोके स्त्रीवधपातकेन च दूषितौ तौ परं क्लेश मन्वभवताम्।

तस्मा न्मूर्खा न्न सेवेत प्राज्ञ स्सेवेत पण्डितान्।

जामातुः कथा–२८.

अकार्य ङ्कुरते मूर्खो न च जानाति गूहितुम्.

आढ्यस्य कस्यचि द्दैवा त्कोऽपि दरिद्रो जामाताऽभवत्। बहोः कालात्परं स इदम्प्रथमतया श्वाशुर ङ्गृहं प्राप्त स्तत्र पाकार्थं निक्षिप्ता न्सिता नुत्तमां स्तण्डुला नालोक्य तेषा मेका म्मुष्टि मादाय स्वमुखे प्राक्षिपत्। अत्रान्तरे श्वश्रू

मागतायां स मूढ स्तां स्तण्डुला नेकदा निगरितु मपारयन्
ह्रियो द्गरितु मनिच्छन् पीनोच्छूनगण्डो निरालापोऽवर्तत।
तस्य चिरागतस्य तादृशी मवस्था मालोक्य भीता श्वश्रू
रोगशङ्कया स्वपति मानाय्य तस्मायदर्शयत्। सोऽप्येन
मालोक्य स्वयञ्च तथैव शङ्कितो झडित्येव कञ्चि द्भिषज
मानाय्याऽदर्शयत्। तावता कालेन मुखान्तस्स्थितेन
जलेनाऽऽर्द्रै स्तण्डुलै रतितरा मुच्छूनगण्ड मेन मालोक्य
वैद्य श्शोफशङ्कया स्वपादेन तस्य मस्तक माक्रम्य शस्त्रेण
तस्य हनु मपाटयत्। तदा तन्मुखान्तस्स्थिता स्तण्डुला
लोकानां हासै स्समं निर्ययुः।

अतोऽग्रे महतां कर्म लज्जाकारि त्यजे न्नरः।

भ्रान्तस्य कथा-२९.

निर्विमर्शा मृषाज्ञानै र्मुह्यन्त्येव ह्यबुद्धयः.

तृषार्तो जलं पातुं तटाकङ्गतः काञ्चि द्युवा जले प्रतिबिं
बितं तटतरो रुपरि निषण्णस्य स्वर्णचूडस्य पतत्रिणो बर्हं
न्दृष्ट्वा सुवर्णं जलान्तः पतितमिति मन्यमान स्तदादित्सया
जल मवतीर्ण श्चले जले किमप्यपश्यंस्तीर मासाद्य पुन
रपि तदेव प्रतिबिंबं दृष्ट्वा सुवर्णजिघृक्षाकुलः पुन र्जल
मवतीर्णो नैव किञ्चि दवाप। एव मेवाऽसकृ त्कुर्वं स्तीरस्थैः

पृष्टो हेतुं वदं स्तैः परिहसित स्तत्क्षणागतेन स्वपित्राऽ
नुयुक्त स्स्वमनोरथं निवेदयामास। तदा स जनक स्ता
ञ्छाया मालोक्य वृक्षस्योपरि स्थित ङ्खगं विद्राव्य पुत्रं
प्रबोध्य गृहं निनाय। एवं निर्विमर्शाः पुरुषाः-

उपहास्याः परेषाञ्च स्वेषां शोच्या भवन्त्यपि।

सन्तुष्टचित्तता. कथा-३०.

असन्तोषो हि दुःखाय पुरुषस्याऽखिलस्य च.

गङ्गाकूले कस्मिंश्चि दग्रहारे केचन प्रव्राजका आसन्।
ते तत्र सदैव भिक्षा मटन्त स्तल्लब्धेनाऽन्नेनाऽतीव सन्तुष्टाः
पीवरा श्चाऽभवन्। एवं स्थिते कदाचि त्तत्रत्याः केचन
पुरुषा स्तान्दृष्ट्वा 'अहो भिक्षाशिनोऽप्येते कथमेवं सन्तुष्टाः
पीवराश्च वर्तन्ते' इति परस्परं भाषमाणा आसन्। तदा
तेष्वेकः 'दर्शयामि वो यत्किञ्चि त्कुतूहलं, सर्वानेवैता
न्कृशा न्करिष्यामि पश्यत' इत्युक्त्वा कदाचि त्ता
न्निमन्त्र्य स्वगृहे षड्रसोपेत मत्युत्तम माहारं भोजयामास।
ते सर्वे तेनाऽऽहारविशेषेण पर न्तृप्ता भूत्वा सदैव तदा
हारास्वादमेव स्मरन्तः परदिनादारभ्य तदलाभेनाऽ
तीवासन्तुष्टचित्ता भैक्ष्ये मन्दादरा यथापूर्व मभुञ्जानाश्च
केवलं कृशा दुर्बलाश्चाऽभवन्। तदा सपुरुष स्स्वसुहृदः

समाहूय तेभ्य एना न्प्रदर्श्य 'पूर्वं भैक्ष्येणाऽपि सन्तुष्टा एते पुष्टा बलिनोऽप्यभवन् । अधुना तु तत्राऽसन्तोषेण कृशा दुर्बलाश्च संवृत्ताः, अतो बलस्य पुष्टेश्च सन्तोषएव मूलम्' इत्यवदत् ।

तस्मा त्प्राज्ञ स्सुखं वाञ्छन् सन्तोषे स्थापये न्मनः ॥

जलभीतस्य कथा–३१.

अशक्तश्चेत् कृत्स्नकार्ये जडो नाऽशं करोत्यपि ।

स्वग्रामाद्विप्रकृष्टं ग्रामान्तरं प्रस्थितः कश्चित्पान्थो मरुप्राये प्रान्तरे गच्छन्ग्रीष्मार्केण सन्तप्ततनु स्तृषार्तो दैवा त्काञ्चि न्नदी माससाद। अवतरणयोग्ये नद्यास्तीरे तिष्ठन्नेव पिपासयो त्तराधरोष्ठे जिह्वाग्रेणाऽसकृल्लिहन्नपि केवलं जलं पश्यन्नेवाऽऽस्त, नैवाऽपिबत्। एतादृश न्तन्दृष्ट्वा 'तृषितो दृश्यसे, तथाऽपि किमिति जलं न पिबसि? किं नक्राद्भीतोऽसि? इतितीरस्थेन केनचि त्पृष्ट स्स ऽवदत् 'नैवाऽत्र नक्रादिकं दृश्यते, किन्त्वेताव ज्जलं कथमहमेक एव पिबेयमित्येव भीतोऽस्मि, अतो न पिबामि' इति । तदाकर्ण्य तीरस्थः प्रत्यवदत् 'रे मूढ! सर्वं जलं त्वयै कैनैव न पीतमिति किं राजा त्वां दण्डयति? यावता जलेन ते तृषाऽपैति तावत्पीत्वा तृषा मपनोद्य सुखी भव' इति।

एवं पुनःपुन रुक्तोऽपि तीरस्थै रन्यैः परिहसितोऽपि यावतो जला द्भीतो नैव जलं पपौ ।

आत्मशक्त्यनुसारेण प्राज्ञः कार्यं समाचरेत् ।

समुद्रयायिनः कथा–३२.

स्वमौढ्यं नैव जानन्ति लुब्धाः पण्डितमानिनः ।

यानपात्रेणाऽम्बुधौ देशान्तरं गच्छतः कस्यचि द्राजतं भाजनं हस्ता न्परिभ्रष्टं जले न्यमज्जत् । तत स्सोऽतीव विषण्ण स्तदैव सागरं प्रवेष्टु मपारय न्भाजनस्य पतनदेशे जले समुत्पन्न मावर्तं दृष्ट्वा तमेवाऽभिज्ञानं मन्यमानः, 'भवतु सागर आवर्तस्याऽधोभागे पतितं मे भाजनं । नाऽय मवसरो मे यानपात्रा दवतरितुम्' अतो ऽवतीर्णमात्रएव जलादुद्धरिष्यामि मे भाजनम्' इति मनसि कृत्वाऽम्बुधेः पारेऽवतारित स्तत्रैव वारिण्या वर्तं दृष्ट्वाऽभिज्ञानधिया तमेव भाजनस्य पतनदेशं मन्यमानो भाजनस्यो द्दिधीर्षया मुहुर्मुहु र्जले न्यमज्जत्। तत्रत्यैः कारणं पृष्टश्चोक्तात्मवृत्तान्त स्सः 'रेमूढ! महांबुधौ किमेक एवाऽऽवर्तोऽस्ति? असंख्याकानां क्षणिकाना मावर्तानां मध्ये कस्याऽऽवर्तस्याऽधो भाजनं मृगयसे? विरमैतस्मा द्वृथाक्ले-

शात्' इति तत्रत्यै रुक्तोऽपि नकिञ्चि द्वद न्पुनःपुन र्नले मज्जन्नेष सर्वैः पर्यहास्यत ।

अतः प्रज्ञावता भाव्यं लोभं त्यक्त्वा नरेण तु ।

अपूपविक्रयिणः कथा-३३.

वस्तुस्थिति मजानानो हास्यते सर्वतो जनैः ।

अध्वगः कश्चि न्नगरं गतोऽतीव बुभुक्षित आपणेऽ ष्टा वपूपा न्विक्रीय कस्याऽपि गृहस्य वेदिकाया मुपवि ष्टोऽपूपा न्भक्षयितु मारेभे । याव त्तेषां पञ्चषानेष बुभुजे तावत्तस्य नैव तृप्ति रुदपद्यत । सप्तमे तु भक्षते तृप्त मात्मानं पश्यन्सजडो मनस्येव मकरोत् । अहो वञ्चितोऽ स्मीदानी मात्मनैव । तृप्त्यापादक स्सप्तम एवाऽपूपः किमिति मया न प्रथमं भक्षितः । किमितिवा प्रथमतो भक्षणेन षडपूपा नाशिताः । अष्टमइव हस्ते न कृताः । धिङ्मांविचारविमूढमिति । एवं पुनःपुन र्वद न्पार्श्वस्थैः पृष्टो हेतुं निवेदयन् सर्वैः पर्यहास्यत । क्रमेण जायमानां तृप्तिं नैवाऽजानात् ।

चण्डीभर्तुः कथा-३४.

स्वकर्तव्य मजानानो हासपात्रं नृणां भवेत् ।

उज्जयिन्या मेको महान् धनिक आसीत् । कृतवि-

वाहे तस्य कुमारे यौवनारूढे सत्येव स पिता पञ्चत्व माप । पित्रा हीनोऽयं धूर्तैः कैश्चि दाक्रान्तोऽल्पेनैव कालेन सर्वं धनं व्ययित्वा दरिद्रोऽभवत् । तस्य भार्या चण्डी मूर्ख मेन मालोक्य, भोः ! श्वो भाविन्युत्सवे पित्रा मे निमन्त्रिताऽस्मि । अतः प्रातरेव मया पितृगृहं गन्तव्यम् । तस्मा त्त्वया यद्येकोत्पलमाला नाऽऽनीयते, तर्हि नाऽहं ते भार्या, न त्वं मे पतिरित्यवदत् । तदाकर्ण्य भीतोऽयं मूढो रात्रावेव राजकीयं सरो गत्वा तत्रो त्पला न्यपचिन्वं स्तद्रक्षकैः कोऽसीति पृष्ट स्तिरश्चा मदण्डं मत्वा चक्राह्वोऽह मित्यवदत् । तद्वाक्यं श्रुत्वा समागतै राजपुरुषै र्बद्धस्स प्रातः राजान्तिक मनीयत। राज्ञा पृच्छ्य-मानश्च स्वसंकल्पितां चक्रवाकता मानिष्कर्तुं चक्रवाक स्येव रुतं कर्तु मारेभे। तच्छ्रुत्वा राजाऽतीव विस्मयाकुल स्सर्व मादित श्श्रुत्वा जातदयो दीन मेनं मूर्ख मदण्ड-यित्वा व्यसृजत् । राज्ञा स्वमोक्षे स्वोपायं कारणं जनाग्रे कथयन् सर्वेषां हासपात्रं बभूव ।

अज्ञप्रभोः कथा-३५.

कस्यचि त्प्रभो र्वार्धके वयस्येकः पुत्रोऽजायत । स त मतिप्रेम्णा वर्धयन्नविलंबेनैव तं युवानं कृत्वा स्वस्य

सर्वं धनं तस्मै दत्वा स्वयं विश्रान्तिसुखं कामयमाना वैद्या नाहूय स्वकुमार मौषधप्रयोगेण सद्यएन युवानं कुरुतेति प्रार्थयामास । ते च वैद्या औषधादिनाऽपि क्षणादेव बाल युवानं कर्तु मसाध्यं विदित्वा तद्रहस्य तस्मा अप्रकाशयन्त एव 'देशान्तरस्थं तादृश मौषधं प्रयत्ना दाहर्तव्यम्, तदर्थं च महान् धनव्यय स्स्यात्, यावदौषधसमागमं तव सुतः कुत्राप्यदृश्ये स्थाने निवेशनीयः' इत्यूचुः । तेषा मुक्तिं श्रुत्वा तत्तथैवेति प्रत्ययेन प्रतिपद्य स्वपुत्रं तेषां वशे दत्तवतः प्रभो स्सकाशा न्महान्तं धनराशि मादाय ते वैद्या स्तस्य पुत्रं कुत्राऽपि स्ववशे गृहे निगूह्य प्रभवे तदा तदा चौषधे रप्राप्तिं व्याजं ब्रुवन्तः कानिचि द्वर्षाणि यापयामासुः । एवं गतेषु केषु चिद्वर्षेषु प्राप्तयौवनं तत्सुतं तस्मा द्गृहा दानीय प्रभवे प्रदर्श्यौषधप्रयोगा देवं ते कुमारो युवा जात इति वदन्त स्तेतथैवेति प्रत्ययतोऽस्मात्प्रभोः पुनरपिमहान्तं धनराशिं पारितोषकं जगृहुः । एवं बुद्धिहीना धूर्तै र्बहुधा वञ्चयन्ते ॥

अगुरुदाहकस्य कथा-३६.

कस्मिंश्चि न्नगरे पूर्णधनो नाम श्रेष्ठी वाणिज्येन महान्तं धनराशि मर्जित्वा स्वस्य वृद्धतादशायां सर्वमेव

तद्धनं स्वपुत्रस्य वशे दत्वा वाणिज्येन धनमेत द्वृद्धिं प्रापयन् सुखी भवेत्यादिदेश । सोऽपि पुत्रः तद्धनं सर्व मादाय देशान्तरं गतो महार्घाण्यगुरुकाष्ठानि क्रीत्वा स्वनगरस्य समीपस्थे कुत्रचि द्ग्रामे सर्वाण्यव तान्यगुरुकाष्ठानि क्रय्यतया प्रसारयामास । केवल मयस्कारैः पूर्णेऽस्मि न्ग्रामे न कोप्यस्याऽऽपण मगुरुविक्रयायाऽगच्छत् । किन्त्वेतदापणात्कि ञ्चिद्दूरस्थ आपणे निहित मिंगालमेव स्वकार्याय सर्वोऽप्य क्रीणात् । तद्दृष्ट्वाऽयं श्रेष्ठिपुत्रः "किमेतै रगुरुखण्डै रत्र प्रयोजनम्? न कोप्येतान्यत्र क्रीणाति, परन्तिङ्गालमेव क्रीणाति । एवं स्थिते, किमित्यस्माभि रप्यगुरुखण्डै रिङ्गालं निष्पाद्य तस्य विक्रय एव न कार्यः?" इति मनसि कृत्वा स्वेन सङ्गृहीताना मुत्तमानां सर्वेषा मेवाऽगुरुखण्डानां दाहेन महान्त मिङ्गालराशिं निष्पाद्य तत्सर्वं तदनुगुणेन मूल्येन विक्रीय स्वमूलधनस्य साहस्र मप्यंश मलभमान स्स्वनगरं ययौ, एवं वस्तुनो गौरवापादकं देश मजानानाःपरां हानि माप्नुवन्ति।

लोके देशानुगुण्येन वस्तुगौरव मिष्यते ।
वाणिज्यैकपरेणै तज्ज्ञेयं श्रेष्ठिजनेन तु ॥

तूलदाहकस्य कथा-३७.

धनसारो नाम कश्चि द्वणिङ्महान्तं तूलराशिं क्रीत्वा

तस्य विक्रयाय वीथ्यन्तरे वर्तमानायाऽन्यस्मै वणिजे तूलस्य जातिं दर्शयन् तन्मौल्यंच न्यवेदयत् । अशुद्धतयेयं तूलजाति र्न तावन्मौल्य मर्हती त्युक्तवति तस्मिन्, तत स्स्वापण मागच्छ न्नयं वणि ङ्मार्गे कस्यचि त्सुवर्णकारस्याऽऽपणे मिलितयोः, क्रय्यस्य हेम्न श्शुद्धिविषये विवदमानयोः कयोश्चि त्सल्लापं श्रुत्वा तन्निर्णयज्ञानकुतूहलेन तत्रैव क्षणं तस्थौ । तदा ताभ्यां मध्यस्थतया गृहीत स्सुवर्णकार स्तयो र्विवादनिर्णयाय क्रय्यं हेमाऽग्नौ प्रक्षिप्य निष्टप्योद्धृत न्त त्ताभ्यां प्रदर्श्य, अशुद्धे र्दग्धतया वर्णांश उज्वलमिदं हेमे दानीं शुद्ध मित्यवदत् । अयंच तूलश्रेष्ठी सावधानं तद्वचनं श्रुत्वा, 'अशुद्धस्य तूलराशे श्शुद्धिकरणेऽप्ययमेवोपायः, स चाऽस्मत्प्रयत्नसाध्यएव' इति मनसि निश्चित्य स्वापण मागतमात्रएव सर्वं तूल राशि मग्निसात्कृत्य, सर्वस्मि न्भस्मीभूते न किञ्चिल्लब्ध्वा सर्वमेव तूल मशुद्धं निर्णीय स्वगृहं ययौ । तत्तद्वस्तुनः परीक्षाक्रम मज्ञात्वा सर्वत्रै वैकां रीति मनुसरतां गति रीदृश्येव ।

प्रतिवस्तु परीक्षायाः क्रमो भिन्नो भावेद्भुवि ।
अग्नौ हि शुद्धता हेम्नो न तूलादे रिति स्थितिः ॥

ओदनवप्तुः कथा-३८.

औचित्यज्ञानविधुरः परां हानि मिहाऽश्नुते.

भूसाराख्ये कस्मिंश्चि द्ग्रामे कश्चि द्धनिक श्श्रेष्ठी न्यवसत् । स स्वक्षेत्रोत्पन्नं महान्तं व्रीहिराशिं तण्डुला न्विरचय्याऽन्तिकस्थे नगरे ता न्विक्रीणन्नाऽऽसीत् । एवं स्थित एकस्मि न्वत्सरे यथापूर्वं तण्डुलानां भारै स्समं नगरं प्रस्थितोऽयं धनिको मार्गे गच्छन्पार्श्वस्थे स्वक्षेत्रे व्रीहिन्विपन्तं कृषीवलं दृष्ट्वा किमेतदिति तं पप्रच्छ । व्रीहीन्वपामीति तेनोक्ते किंप्रयोजनायेति स तं पुनः पप्रच्छ । व्रीहीणा मुत्पादनक्रम एषः । यादृशं बीजमुप्यते तादृशं फलमाप्यत इति कृषीवलेनोक्तं श्रुत्वा तदेव पुनः पुन स्स्मर न्स्वमनस्येव मचिन्तयत् । "व्रीहीणां वापेन व्रीहयो लभ्यन्ते । न हि व्रीहीणां व्रीहिरूपेणैवोपयोगोऽस्ति । किन्तु तण्डुलाधानेनैव । तथा तण्डुलानां स्वेनैव रूपेण नभक्ष्यत्वमस्ति । किन्तु पाकानन्तर मोदन निष्पादनेनैव । तण्डुलाधाने व्रीहीणां निस्तुषीकरणाय महान्धनव्यय स्स्यात् । तण्डुलानां पाकेनौदननिष्पत्तये काष्ठानां मूल्यमधिकं देयं स्यात्; उप्तानां बीजानां सदृशफलं प्रत्युत्पादकत्वे सिद्धे सति, किमिति मया सिद्धमन्नमेव

नोप्येत, येन साक्षादोदनस्यैव प्राप्ति स्स्यात्" इति। एवं विचिन्त्य स्वानीतं सर्वमेव तण्डुलराशिं तत्रैव पाके नौदनं निष्पाद्य सर्वमेवौदनराशिं क्षेत्रेषु विकीर्य समानं फलमोदनं प्रतीक्षमाण स्सुचिरं तत्रैवाऽतिष्ठत्।

श्रेष्ठिपुत्रस्य कथा-३९.

अज्ञोऽनर्थाय शब्दैकपरोऽतात्पर्यविद्भवेत्.

भाग्यनगरे कश्चिद्वणिगाऽऽसीत्। तस्यैकः कुमार स्स्वजातिक्रियां वाणिज्यं कर्तुमजानानः केवलं तत्रतत्र पर्यटन्नाऽऽसीत्। तमालोक्य तत्पिता कथंचिदिदं वाणिज्यं शिक्षयितुकाम स्तंसदैव स्वापणे रक्षन्नवर्तत। एवं स्थित एकस्मिन्दिने सपिता मध्याह्नेऽभ्यवहाराय स्वगृहं जिगमिषः कृतभोजनं स्वपुत्रं संबोध्य 'कुमार! रक्ष्यतां त्वयाऽऽपणद्वारम्। यावदह क्षणं गृहंगत्वा कृतभोजनो निवर्त्स्यामि' इत्युक्त्वा गृहं ययौ। गतमात्र एव पितरि सकुमार श्शृंगाटके मिलितं जनौघं दृष्ट्वा स्वयमपि तत्र गन्तुकामः पितृशासनंचा शून्यं कर्तुमिच्छन्नापणस्य द्वारपट्टक मापणतो बलादुत्पाट्य स्वांसे वहन्नेव चतुष्पथं गत स्तत्रनृत्यन्त नटं पश्यन्नास्त। भोजनं निर्वर्त्य गृहादापणं गन्तुं चतुष्पथा त्किञ्चिद्दूरस्थेन मार्गेण गच्छन्तं

स्वपितरं विलोक्य समूढः कुमार स्तदग्रतोगत्वा "त्वदुक्तमापणद्वार मेतावत्कालं मया रक्षितं गृह्यतामेतदिदानीम्" इति स्वांसे धृत मापणद्वारपट्टकं तत्पुरतः प्रसारयामास। तदालोक्य पिता पुत्रस्य मौर्ख्यं प्रति परं विषीदन् धिङ्मूर्ख! किमित्यापणद्वारमुत्पाटितवानसीति वदन्नेवाऽऽपण मागतो यावत्पश्यति, तावदापण स्सर्वतोऽपि प्रविष्टैर्वानरै रलुठ्यत। तेन वणिङ्महान्तं धननाश मलभत। अतः-

बक्तु स्तात्पर्यविदुषा श्रोत्रा भाव्यं सदैव तु.

वणिज स्तद्भृत्यानांच कथा-४०.

अज्ञातहृदया मूर्खा घ्नन्ति स्वार्थं परार्थवत्।

वणिक्कश्चि त्स्वदेशेऽधिकं लाभ मनासाद्य देशान्तरे वाणिज्येन धन मर्जितुमिच्छन्कस्यचि दुष्ट्रस्योपरि नवव स्त्रपूर्णं महान्तं पेटिकाभारं निवेश्य स्वभृत्यैस्सह प्रस्थितोऽभवत्। मार्गे कस्मिंश्चि दध्वन्यतिक्रान्ते तस्योष्ट्रो भारेणाऽतिमात्र मवसन्नः पुरः पदमेकमपि प्रचलितु मशक्नुवन्नध शिशश्ये। तदालोक्य सवणिक्स्वभृत्यानाहूय "भोः! अयमुष्ट्रोऽतीवाऽवसन्नो दृश्यते। अयमेको नैतावन्तं भारं वोढुं शक्नोति। अतोऽस्यभारस्याऽर्धमपि वोढुं शक्तं द्वितीयं करभ मानेष्यामि। कालस्याऽस्य मेघागमसमयतया कदाचिद्वृष्टि स्संभवेत्। यदि वृष्टिः पतेत्, तदाऽस्माकं वस्त्र-

पेटिकाया श्चर्म यथा नांऽभसा स्पृश्येत, तथा युष्मा-
भिरिहस्थैः कार्यम्" इत्युक्त्वा वस्त्रपेटिका मुष्ट्रपार्श्वेऽवस्था-
प्य स्वयं द्वितीयोष्ट्रान्वेषणाय प्रास्थितो यावत्किंचिद्दूरं
गच्छति, तावदेव नभस्यकस्माद्गुत्पन्नो मेघो वार्षितु मारेभे।
तदा तत्रस्थिता स्तद्भृत्याः 'यथा नांभसा पेटिकाया
श्चर्म नस्पृश्येत तथा कार्यमित्येवाऽस्माकं प्रभो राज्ञा'
इति मनसि कृत्वा पेटिकातो वस्त्राणि बहिःकृष्ट्वा तैःपेटि-
कायाश्चर्माऽऽवेष्टयन् । पतितै र्वृष्टिबिन्दुभि र्नूतनानि
वस्त्राणि सर्वाण्यप्यार्द्रीबभूवुः। नवक्रीतेनोष्ट्रेण साकं समा-
गतो वणि क्सर्वाण्येव वस्त्राणि वृष्टिबिन्दुभि र्नाशितानि
दृष्ट्वाऽतीव क्रुद्धः "रेमूढाः! किमिति सकलोपिवस्त्रौघो
नाशितोंभसा युष्माभिः?" इत्यपृच्छत् । "भोः स्वामिन्!
भवतैवेद मादिष्टं यदुदकात्पेटिकाया श्चर्माभिरक्षणीयमिति।
कृतं चैतदस्माभिः पेटिकान्तास्स्थतैर्वस्त्रैरेव चर्माऽऽवृण्वानैः।
कोवाऽस्माकं दोषः?" इति तेऽब्रुवन्। तच्छ्रुत्वा सवणिक्
"रेजाल्माः! चर्मण्यार्द्रे वस्त्राणि नश्येयुरिति वस्त्राणां
रक्षार्थमेव चर्मणोऽभिरक्षणं मयाऽभिहितम्। न तु वस्त्राणां
नाशेनाऽपि चर्माभिरक्षणम्" इत्युक्त्वा नवक्रीते करभकेऽ
प्यर्धं भारं निवेश्य स्वदेशं गत स्तान्भृत्यान्विहाय स्वय
मेव वाणिज्य मकरोत् ।

मनसोऽनवधानम्. कथा—४१.

मनसोऽनवधानेन मूढः क्लिश्नाति केवलम्.

कुसुमपुरनाम्नो नगरा त्क्रोशद्वयदूरे ग्रामे निवसन्क
श्चन धनिक स्स्वपादयो रनुरूपे पादुके निर्मापयितुकाम
स्स्वपादयोः परिमाणं स्वभृत्यस्य हस्ते दत्वा 'एतत्प्रमा-
णके पादुके चर्मकारेण कारायित्वाऽऽनय' इत्युक्त्वा तं
नगराय प्राहिणोत्। अत्रान्तरे तेनैव भृत्येन निर्वर्तनी-
यस्य कार्यस्योपस्थित्या पादुकानिर्मापणाय धनिकेन
स्वेनैव नगरं गन्तव्य मासीत् । अतस्सएव नगरंप्रति
प्रस्थितो मार्गे तीव्रेणाऽऽतपेन संतप्ततनु र्महता श्रमेण
नगरं गत्वा चर्मकारगृहद्वारं यावत्प्रविशति, तावद्गात्मना
भृत्यस्य हस्ते दत्तं स्वपादपरिमाणं स्वगृहएव विसृष्टं
स्मृत्वा तदानयनाय प्रत्यावृत्य द्विगुणीकृतप्रयासो महत्या
त्वरया स्वग्रामं गत श्चिराच्च स्वगृहे स्वं पादपरिमाण
मन्विष्यन्नन्तत स्तद्दुर्लभेनाऽतीव संतुष्टः पुनर्नगरं द्विगु-
णीकृतयागत्याऽऽसाद्य चर्मकारगृहं गत स्स्वकार्यं निवेद-
यामास । स्वपादपरिमाणे तेन प्रार्थिते तद्दास्यन्नयं
'प्रथम मागतेन मया यद्यपि मे पादपरिमाणं गृहेविसृष्टं
विस्मृत मभूत्। त्वद्गृहद्वार मागतमात्र एवाऽहंतत् स्मृत्वा

पुनर्ग्रामं गतोऽद्यैवाऽऽनीतवानस्मि' इति वदन् गृहादानीतं स्वपादपरिमाणं तस्य चर्मकारस्य हस्तेऽददात् । स्वपरोक्षे येनकेनाऽपि प्रकारेण मितेन पादपरिमाणेनाऽसंतुष्टोऽयं चर्मकारः साक्षात्तत्पादयोः प्रदर्शनमेवाऽपैक्षत । तदा स्वपादावग्रतः प्रसारयन्नयं धनिकः 'प्रथमं ममाऽऽगमन-एव मम पादयो स्सन्निहितयोरपि तदैव तावप्रदर्श्य किमिति मया वृथैव गतागताभ्या मियान् क्लेशोऽनुभूतः अहो धिङ्मे मनसोऽनवधानम्' इति मनसैव चिंतयन् परं स्मात्मन्येव लज्जितः पादुके निर्माप्य ताभ्यां स्वगृहं ययौ ।

मूषककन्यायाः कथा-४२.

सुदूरमपि गत्वाऽत्र या या भवति सैव सा.

आश्रमे कुत्रचि न्महातपाः कश्चिदृषि रुवास । स एकदा स्नातुं नदीं गत स्तत्र श्येनहस्ता त्परिभ्रष्टां कांचि न्मूषिकां दृष्ट्वा जातानुकम्प स्स्वतपोबलेन तां मानुषीं कन्या मत-नोत् । तस्यां चैनमेवाऽनुसृत्याऽऽगतायां सत्रृषि स्तां स्वाश्रममानीय महता प्रेम्णा पोषयन्नाऽऽसीत् । यदा सा प्राप्तयौवना जाता, तदा स तां यस्मै कस्मैचन महाशक्ति-मते वराय दातु मिच्छन्नंबरे भ्राजमानं त्रय्यात्मकं सूर्यं

दृष्ट्वा तमेवोचितं वरं मन्यमानः 'भगवन्नंबरमणे! कि म्मे कन्या मुद्वहसे?' इत्यपृच्छत् । तच्छ्रुत्वा सूर्योऽवदत् 'भगवं स्तपोनिधे! महते कन्यका प्रदेयेति किल तव मनोरथः? भवान्मां महान्तं जानाति मेघोऽपि मा माच्छा-दयति, अतो मेघएव मत्तोऽपि महत्तरः, स एव ते कन्या मर्हति' इति । मेघमासाद्य यदर्षिरपृच्छत्, तदा सोऽव दत्, 'वायुःकिल मांकुत्राऽपि कोणे नयति, अतो मत्तोऽपि महत्तरो वायु स्तवकन्यां परिणेतुमीष्टे' इति । वायुंगत्वा पृच्छन्नयमृषिः 'मम सर्वाऽपि शक्तिः पर्वतेन निरु-ध्यते, अतो मदपेक्षया महत्तराय पर्वताय दीयतां ते कन्या' इति तेनाप्युक्तः पर्वतं गत्वाऽपृच्छत् । पर्वतो-प्येन मवदत् 'यद्यप्यचलोऽहम्, तथाऽपि मूषकेणाऽपि मेमहानपाय स्संभवति । यतोमां मूषकः खनित्वा पात-यति, अतो मूषक एव ते कन्याया अनुरूपो वरः' इति । तच्छ्रुत्वा मूषकमेव स्वकन्याया अनुरूपं परं मत्वा स त मासाद्य किंपरिणीयते मे कन्या त्वये त्यपृच्छत् । 'मूष केण मया परिणीता ते कन्या मानुषी कथंमे बिलं प्रवेष्टुं प्रभवाति' इत्युक्तवति मूषके सत्रृषि स्स्वकन्याया मानुषं रूपमेव प्रसक्त परिणयेऽन्तरायं मत्वा स्वतपोबलेन झडि-

यत्र तां कन्यां पुनर्मूषिकां परिणमय्य तां मूषिकायार्प-थामास । साऽपि तदा स्वानुरूपं वरं लब्ध्वा बिलं गता तेन साकं सुखमुपास । एवं—

मूषकप्रकृति र्या तु न सा स्या ज्जातु मानुषी ।

लुब्धस्य कथा-४३.

अतिलौभ्यवतो वित्त मितरै रनुभूयते ।
सम्मार्जनीव धान्यौघं लुब्धोऽर्थं तु समूहति ॥

चंद्रपुरे नाम पत्तने कश्चिल्लुब्ध स्स्वगृहे विद्यमानानि नानाविधानि वस्तूनि स्वै र्बन्धुभि र्भुज्यमानानि दृष्ट्वा तद-सहमान स्सर्वमेव वस्तुजालं विक्रीय लब्धेना र्थेनैकं सुवर्ण-खंड क्रीत्वा तच्च स्वगृहे निधातुं शंकमान स्स्वगृहस्य पाश्चात्येंगणे कुत्रचि द्भूमौ निखाय तदुपरि महतीमेकां शिलां निवेश्य सुवर्णखण्डं सुरक्षितं मन्यमानः प्रत्यहं सायंप्रातरपि तां शिला मुत्क्षिप्योत्क्षिप्य स्वर्णखंडस्य दर्शनमात्रेणैव प्रमोदमानः कालं क्षिपन्नाऽऽसीत् । अस्यैव प्रतिवेश्यस्याऽमुं क्रमं चिरादवलोक्य किमित्ययं प्रत्यहमेवं करोतीति चिंतयं स्तस्य परोक्षे तां शिला मपनीय निपुण मवलोकयन्सुवर्यस्य खण्डं दृष्ट्वा क्षणा-देव तदादाय शिलां यथापूर्वं निवेश्य स्वगृह मगमत ।

अचिरादेव स लुब्ध स्तत्राऽऽगत्य यथापूर्वं शिला मुत्क्षि-प्य यदापश्यति, तदा सुवर्णस्य खण्डं नापश्यत् । ततश्च महता शोकेन स्वशिरो वक्षश्च ताडय न्क्रन्दितु मारेभे । तदाक्रंदितं श्रुत्वा प्रातिवेशिक स्तत्कारण मजानन्निव 'किं ते शोकस्य कारणम्?' इत्यपृच्छत् । लुब्धे निजं वृत्तान्तं कथयति प्रतिवेशी, किमित्येवं खिद्यते भवान् । स्वर्णखंडस्य स्थाने शिलाखंडमेकं निवेश्य तद्दर्शनेनैव प्रमोदतां भवान् । उभाभ्या मप्युपयोगाभावा न्न तयो द्विषये तव भेदोऽस्ति इत्युक्त्वा प्रेषयामास ।

चटकयोः कथा-४४.

कस्मिंश्चित्क्षेत्रे महानेको न्यग्रोधपादप आसीत् । तस्मि न्नीडान्निर्माय द्वौ चटकौ न्यवसताम् । कस्माच्चि-त्काला त्परं तयोरेकश्चाटकैरोऽजायत । तौ त मतिप्रेम्णा पोषयन्तौ क्षेत्रारूढै र्धान्यादिभिरेव वृत्तिं कुर्वाणा ववर्ते-ताम् । सोऽपि वृक्षः क्षेत्रमध्यस्थित. केवलं कृषे विघा-तुकोऽभवत् । क्षेत्राधिपति स्त दृष्ट्वा वृक्षस्य च्छेदेनाऽपि कृषे स्समीकरणं मन्यमान स्स्वपुत्र माहूय 'अस्मत्कृषे र्विघ्नभूत मिमं छेत्तुं यःकोऽपि सहायो मृग्यताम्' इत्यु-वाच । पुत्रोऽपि तथेत्युक्त्वा पित्रासाकं गृहं ययौ । एवं

पितृपुत्रयो स्सल्लापं श्रुत्वा नितरां भीता चटका स्वपतिं संबोध्य "नाथ! संप्राप्ताऽस्माक मिदानीं महत्यापत्। यत्क्षेत्रस्वाम्य स्मदाश्रयभूतं वृक्षं छेत्तुं प्रयतते । कुत्रे दानीं गच्छामः? कथंवाऽवयोरपत्यं रक्षणीयम्? इति महती मे चिंता वर्तते" इति । तदाकर्ण्य चटकः प्रत्यव दत् 'प्रिये मा भैषीः नैतयो स्संभाषणमात्रेणा स्माकं हानि स्संभवति । किंचेदानीं ताविमौ सहायान्वेषणप्रवृत्तौ' इत्युक्त्वा तूष्णीं भार्यया पुत्रेण च साकं तत्रैव निर्भयं न्यव सत् । क्षेत्रस्वामिपुत्रोऽपि सहायान्वेषणप्रवृत्तो वत्सरपूगा नन्विष्यान्विष्याऽपि सहाय मलभमानः पित्रा पृच्छ्यमा- नश्च सहायालाभमेवा न्तरायं वदन्ना सीत् । एवं सुचिरं प्रतीक्ष्यापि सहायालाभेन स्वकार्यमन्तरितं दृष्ट्वा क्षेत्रस्वामी पुत्रमाकार्य स्वयमेववृक्षं छेत्तुं निश्चय मकरोत् । एवं तयो निश्चयं ज्ञात्वा स चटकः पत्नीं संबोध्य, 'प्रिये! यावदिमौ स्वकार्येऽन्येषां साह्यमपेक्षमाणा वास्ताम्, ताव न्नास्माकं काऽपिभीति रासीत् । इदानीं तु सहाया पेक्षां विना स्वयमेव स्वकार्यं कर्तुं निश्चितवन्ताविमौ, अतो नेतःपर मत्रास्माक मवस्थानं युज्यते एहि गच्छामः' इत्युक्त्वा भार्यपुत्राभ्यां सह वृक्षान्तरं गतस्सुखं न्यवसत् ।

अतः—प्राज्ञ स्स्वार्थं स्वयं कुर्या न्नान्याधीनो भवे त्सदा ।
अन्याधीनस्य कार्यं हि चिरा त्फलति कुत्र चित् ॥

तत्वविदः कथा—४९.

दोषं न वेत्ति प्राज्ञोऽपि स्वं त मन्यस्य पश्यति.

समुद्रतीरे कस्मिंश्चिदग्रहारे निवसन्कश्चन तत्ववेदी स्वशिष्यैस्सह समुद्रवेला मासाद्य महान्तं जलराशि मालोक्य तन्निर्मातु र्दैवस्याऽत्यद्भुतां शक्तिं प्रति शिष्या- न्वदन्मनस्यतीव विस्मयमान आसीत् । तदानीमेवा तिदूरा न्महता वेगेनाऽऽगच्छन्ती काचित्तरणिः कस्याश्चि च्छि- लाया स्तीक्ष्णे तिरश्चीने शिखरे दृढलग्ना कृतरंध्राच जलेन्य- मज्जत् । तत्र स्थिता स्सर्वेपि जना निखिलेन वस्तुजालेन समं नौगतां गतिमेवागमन् । तदेतद्वयं प्रत्यक्षीकृत्य नितरां पर्या कुलहृदयोयं तत्ववित्स्वशिष्या नालोक्याऽवदत् 'पश्यत दैवस्याऽन्याय्यं निर्धारणम्, यदेकस्य दण्डार्हस्य पात- किनः कृते तरणावेकस्यां सहागमनमात्रादेवा न्येषां सर्वे षामेवैवं दण्डनम्' इति । एवं पुनःपुन स्तदेव वदन्यदा तत्रैव निश्चल स्तिष्ठति, तदा निकटस्थिता न्नीडा न्निर्गता काचि त्पिपीलिकाऽस्य पादेन स्पृष्टासती सुतीव्रमेन मद- शत् । एवं दष्टमात्रएव स तत्ववि त्तां पिपीलिकां निकट-

नीडस्था स्सर्वाएवान्याः पिपीलिकाअपि पदा विमर्द्य नाश यामास । तस्यैतादृशं कार्यं दृष्ट्वा तत्क्षणं तस्याऽग्रे प्रादुर्भूतः कश्चि द्देवदूत एनं संबोध्य "आर्य! त्वयैव प्रथमं पदा स्पृष्टायाः एकस्याः पिपीलिकायाः कृते सर्वाएवान्या निडस्थाः पिपीलिकाः पदा विमर्द्य नाशितवा न्भवान्नेव किल भगवतो देवस्य निर्धारण मन्याय्यं निर्धारयितुं प्रभवति? किंभवानिदानी मत्रोत्तरं प्रतिपद्यते?" इत्यपृच्छत्। तच्छ्रुत्वा शिष्यमण्डलमध्यस्थोऽयं तत्ववि त्किमप्युत्तर मप्रतिपद्यमान स्तोष्णीं ललज्जे ।

क्षपणकस्य कथा-४६.

कस्मिंश्चि द्ग्रामे कश्चित्क्षपणक उवास । स तत्रस्थानां सर्वेषामेव सुविदित स्सर्वेषां स्नेहपात्रंचा भवत्। एवंस्थित एकस्मिन्दिने तं क्षपणकं भिक्षार्थमटन्तं जंघायां कश्चिदलर्कोऽदशत्। तेन समुत्पन्नो महानूक्तप्रवाहोऽतीव वेदनां तस्य जनयामास । एवं महत्याविदनया वीध्या मागच्छन्तं मार्गेऽभिमुखागतैः पंचषैः पुरुषैः प्रत्येकं कारणं पृष्टः 'अलर्को मा मदशत्' इत्यवदत्, तच्छ्रुत्वा सर्वे ते 'हन्त! कीयती भगवतो वेदना!' इति वदन्तः खिन्नाश्चा गच्छन्। पुनर्मार्गे गच्छन्तमेनं ग्रामस्थितेष्वेकैकोऽपि तथैव कारणं

प्रष्टुमुपचक्रमे । सक्षपणकोऽपि तदेवोत्तर मेकैकस्मा आवृत्यावृत्य परिश्रान्तो मनस्येव मचिन्तयत् । अहो! नाह मत्रत्यानां सर्वेषामेवाऽविदितः। अत एकैकोऽपि मामेवमेव पृच्छति। कति वारा नह मेकमेवोत्तर मावर्तयेय? अत एवं करिष्ये' इति । एवं मनसि विचिंत्य ग्राममध्यस्थितस्य कस्यचिदुन्नतस्य मण्डपस्योपरि समारूढ स्सर्वेषामुद्वेजकेन विकृतेन तारेण स्वरेणापरिस्फुटाक्षरं चुक्रोश। तदाकर्ण्य सर्वे ग्रामस्था स्तत्रागत्य यदा सर्वतः पश्यन्ति, तदा सक्षपणकः भोः! किमिति संभ्रान्ता स्तत्रतत्र पश्यथ? पश्यत मा मत्र मंटपो परि स्थितम् । सर्वेयूयं श्रृणुता वधानेना वधारयत च, "य एष मम जङ्घायां रक्तप्रवाहयुक्तो व्रणो दृश्यते। सोऽय मलर्कदंशनजनित इति। ग्रामस्थेष्वेकै कस्यापि समान मुत्तर मलर्कदंशनरूप मावर्तयितु मपारयन्नहं सकृदेन सर्वान्वो ज्ञापितवानस्मि गच्छत" इत्युच्चै रवदत् । तच्छ्रुत्वा क्षपणकस्यो पायं प्रति विस्मितेष्वपगतेषु सर्वेषु सोऽपि मण्डपादवप्लुत्य परिहसितो मठिकां ययौ ।

यतिनः कथा-४७

अज्ञता नाम कस्येह नोपहासाम जायते?

कस्मिंश्चिन्मठे कश्चिद्यति रासीत् । सकदाऽपि बहि-
र्नगच्छ न्मठएवा वर्तत । तस्य मठे मूषकाणा मुपद्रवेण
रात्रौ तस्य निद्राया महान्विघ्नो बभूव। एवंस्थिते कदाचि
दात्मसकाश मागताय कस्मैचि दुपाध्यायाय स क्लेशमिमं
कथयामास । सचोपाध्याय स्तदाकर्ण्य 'अल्पस्य कृते
किमिति भवानेतावन्तं क्लेश मनुभवति? कंचिन्मार्जालं
मानाय्य मठे स्थापयतु । सएव सर्वा न्मूषका न्खादति'
इत्यवदत् । 'न मया दृष्टचरः कीदृशो मार्जार इति,
नाऽपि मया ज्ञातपूर्वः कुत्रवा सलभ्यत इति' इत्युक्त-
वति यतौ 'यो धूसरं लोमशं चर्म पृष्ठे धारयति, यस्यच
लोचने कपिले, सएव मार्जारः, सएष रथ्यायां यत्रकु-
त्रापि सञ्चरति, त मेभिश्शिष्यै रानाय्य मठे स्थापयतु'
इत्युक्त्वा स उपाध्यायो जगाम । गतवत्युपाध्याये यति-
रयं शिष्यानालोक्य 'श्रुतमेवकिल भवद्भि रुपाध्यायो
दीरितं मार्जारलक्षणम्। तदन्विष्या नयत कञ्चिन्मार्जारम्'
इत्युक्त्वा व्यसृजत् । शिष्याअपि प्रस्थिता स्तत्र तत्रो-
क्ताभिज्ञानसंपन्नं सत्वं मृगयमाणा रथ्याया मायान्तं
कृष्णाजिनं पृष्ठे परिदधानं कपिलाक्षं कञ्चिद्वटुं दृष्ट्वा
'हन्त! सिद्धार्थास्स्मः, आधिगतोऽस्माभि र्मार्जालः,

यतोऽयमेव निरुक्ताभिज्ञानसंपन्नः' इति निश्चिता स्तमेनं
यतिसकाश मानिन्युः, तं दृष्ट्वा यतिरप्युपाध्यायोदीरितै
र्लक्षणै रुपेतोऽयऽमेव मार्जारो भवितु मर्हतीति वदन्मूषक-
ग्रहणाय मठे कुत्रचि दाभ्यंतरे गृहे तं निवेशयामास ।
जडात्मा सोऽपि वटु र्यतिवचनेना त्मानं मार्जारमेव मन्य-
मानो मठान्तरे तूष्णीं निशा मनैषीत् । उपाध्यायः प्रात
र्मठ मागत्य यतिना साकं संभाषमाण स्तं रात्रौ सुख-
निद्रा मपृच्छत् । 'मार्जारे मठान्तरे निवेशितेपि मूषकाणा
मुपद्रवो न शशाम' इत्युक्तवति यतौ, कीदृशो मार्जारो
युष्माभि रानीतः, तमानयते त्युपाध्याय श्शिष्यान वदत्।
ते गृहान्तरा दानीतं वटुं स्वशिष्यं पूर्वस्यां रात्रौ स्वशि-
ष्येष्वदृष्ट मत्रैवनिरुद्धं दृष्ट्वाऽतीव हसन् 'रेमूढाः!
क्वायं मानुषो वटुः । क्वच स तिर्य ग्लोमलाङ्गूलवां
श्चतुष्पा ज्जंतु र्मार्जारः, धिग्जाल्मान्' इत्युक्त्वा वटुमु-
न्मुच्या न्येद्यु स्स्वयमेव मार्जारमेक मानीय पठे निवेशया-
मास । अनेनच शान्ते मूषककोलाहले यति स्सुखेन
निद्रां सिषेवे ।

ब्राह्मणपुत्रस्य कथा-४८.

जीवत्यर्थदरिद्रोपि धीदरिद्रो न जीवति ।

पाटलीपुरे रुद्रशर्मा नाम ब्राह्मणो बभूव । तस्य द्वे भार्ये आस्ताम् । तयो ज्यायसी सुतमेकं प्रसूय दिवं गता । अयं शिशुरपि तत्पित्रा कनीयस्या हस्ते निक्षिप्त आसीत् । सापि तं शिशुं पत्युर्मुखविकासायैव केवलं पोषयन्ती कदाचि द्रूक्षं कंचि दाहारं तस्मा अददात् । तेनाहारेणोदरएवावस्थितेन समुत्पन्नरोगोऽयं शिशु र्धूम्रवर्ण स्स्थूलोदरश्चाऽभवत् । तं तादृश मालोक्य पिता स्वपत्नीमाहूय तत्कारणं पप्रच्छ । क्षीरघृतादिभि स्स्निग्धै राहारै रुपचरितस्याप्यस्य बालस्य स्थितिरीदृश्ये वेति तयोक्ते विषण्णहृदय स्सतूष्णी मवर्तत । एवं कतिपयेषु वर्षेष्वतीतेषु सप्तमे वयसि वर्तमानोयं बाल स्सहजया धिया संपन्नः 'अहो! कनीयसी मे माता मामेवं क्लेशयति, कथमस्याः कंचित्प्रतीकारं कुर्याम्?' इति मनसि विचिंत्यै कस्मिन्दिने राजगृहादागतं स्वपितरं संबोध्य तात मम द्वौ जनकौ स्त इत्यवदत् । पूर्वमेव सपत्नीपुत्रविरोधाचरणेन शंकितचित्तोऽयं किमस्या उपपातिरपि भवेदिति शंकाकुलो भार्यायै भृशं कुप्यं स्सस्या दर्शनमपि पर्यहरत् । एवं कतिचिद्दिवसेषु गतेषु सा पत्युर्विरागकारणं मभ्यूह्य बालमेनं सम्यगभ्यंगाहारादिभि रुपचारैः

संतोष्य स्वांके निवेश्य, 'शिशो! किं ते पितरं प्रकोपितवानसि?' इत्यपृच्छत् । सबुद्धिमान्बालोऽपि सहजां धीरता मवलंब्य 'तव पुत्रा न्सम्यक्पोषयन्ती किमिति मामेवं क्लेशयसि? पश्येतोप्यधिकतरं पितरं कोपयामि, येनायं तव निष्कासनमेव गृहा त्कुर्यात्' इति तां परं भीषयामास । इतःपरं नाहं ते किंचिदपि विप्रियं चरिष्यामीति तया प्रतिज्ञाते, सबाल स्तां संबोध्य, 'एवंतर्हि राजगृहान्मम पितर्या गच्छत्येव तव दासीष्वेका दर्पण मेकं तदभिमुखं धारयतु' इत्यवदत् । सपद्येव राजगृहादायान्तं तत्पितरं दृष्ट्वा दास्यैकया दर्पणे तदभिमुखं धृते, सबालः 'तात पश्य मे द्वितीयं पितरं' इति वदन्नेव तत्प्रतिबिंबं पित्रेऽदर्शयत् । तेन सपिता बालस्यैषा नर्मोक्तिरिति निश्चित्य पत्न्यां शंकां विजहौ, सापि बालस्य प्रतिभाविशेषेण संतुष्टचित्ता तत आरभ्यातीव प्रेम्णा तं पुपोष ।

न कालनियमोह्यस्ति धीमतां धीप्रकाशने ।

कदर्यस्य कथा—४९.

प्राणेभ्यो प्यन्नमुष्टिर्हि कृपणानां गरीयसी ।

कस्मिंश्चि न्नगरे कश्चित्कदर्य आसीत् । सोऽतीव धनवानप्य लवणै स्सक्तुभिरेव वृत्तिं कुर्व न्न कस्मैचि त्किंचि

द्दौ, नापि स्वयं बुभुजे। एकस्मि न्दिने क्षीरिणी पाचयि-तव्येति तस्य महती स्पृहा संजाता । तत स्सभार्या माहूय क्षीरिणीं पचे त्यादिदेश। चिरा त्कदन्नेनैव निर्विण्णा सा दैवा दिदानी मस्य क्षीरिणै स्पृहा संजातेति संतुष्टा महत्या त्वरया क्षीरिणीं पंचन्त्यासीत् । अत्रान्तरे तस्य कदर्यस्य मित्रं कश्चि त्तं द्रष्टुं तद्गृहद्वार मागत्य कार्य-वशा त्तत्रागतां कदर्यस्य भार्यां दृष्ट्वा 'क्वास्ते मम मित्रं वे पतिः?' इत्य पृच्छत् । साऽपि गृहे पत्युरवस्थिति मनवस्थितिं वा स्वयमेव निवेदयितु मपारयन्ती पत्यु रभिप्रायं जिज्ञासमाना गृहान्तः प्रविश्य भर्त्रे मित्रागमनं निवेदयामास। तत स्सकदर्य स्सुस्थोऽपि तदानीं स्वमि-त्रस्य दर्शने तत्सत्काराय पच्यमानायाः क्षीरिण्या भागो देय स्स्यादिति शंकमानः, 'प्रिये! अहमद्य शय्यायां शये; त्वंच मम पादसमीपे समुपविश्य पति र्मे मृतइति रुदिहि; एतद्दर्शनेन प्राहुणिको निर्गच्छेत् । निर्गते च तस्मिन्नावामेव क्षीरिणीं भक्षयावः' इत्युक्त्वा स्वयं शय्यायां शिश्ये। भार्ययाच तथाकृते, स धूर्तो वयस्यः 'नून मियं निदानीमेव क्षीरिणीं पचन्ती दृष्टैव दृष्टा मया, गृहाभ्यंतरं गता ह्येवं करोति। अस्याः पतिश्च रुजं विन

कथं म्रियेत? नियत मेतौ मम क्षीरिण्या भागपरिहाराया नेनोपायेन मां निष्कासयितु मारब्धवन्तौ । भवतु नाह मिदानी मितो गच्छेयं, तत्त्वत एवैत द्विजानामि' इति निर्धार्य तद्गृहद्वार एवो पविष्टः 'हामित्र! हामित्र! कथ मक-स्मान्मृतोऽसि?' इत्युच्चैः क्रंदितु मारेभे। तस्याक्रंदितं श्रुत्वा तद्बांधवा स्तं कदर्यं सत्यमेव मृतं मन्यमानास्तद्गृह माजग्मुः। सर्वानेव ता न्दृष्ट्वा तत्पत्नी रहसिपतिं संबोध्य 'रेमूढ! शीघ्र मुत्तिष्ठोत्तिष्ठ, अन्यथा धूर्तस्यास्य प्राहुणिकस्या क्रंदितेन नो बांधवा स्सर्वेऽत्रसमागता स्त्वां सत्यं मृतं मत्वा श्मशानं नेतुं यतंते' इत्यवदत्। तच्छ्रुत्वा स कदर्यः आः! पापोयं प्राहुणिकः कथमेवं प्रवृत्तः! भवतु कथंचि-दपि तस्य क्षीरिण्या भागः परिहरणीयः, इति वदं स्तथैव शिश्ये। तत स्तस्य बांधवास्सुचिरं प्रतीक्ष्य तस्मि न्ननु-त्थिते कदर्ये सत्यमेव तं मृतं निश्चित्य तं श्मशानं नीत्वा दग्धु मारभंत। तदानीमपि सहैवागतया भार्यया पुनःपुनर्बोधितोऽपि क्षीरिणीभागं मित्राय दातु मनिच्छ-न्नेव प्रिये! नाहं प्राणानां व्ययेनापि तथा शोचामि, यथा मे सख्युः क्षीरिणीभागदानेन इति वदन्नेवादह्यत।

प्राणान्वापि त्यजंत्येते नान्नमुष्टिमपि क्वचित।

अविवेकिता कथा-५०.

बहोः कालादारभ्य कंचिद्राजान माश्रितः कश्चित्पुरुषो राजाश्रयेण स्वस्य किञ्चिदपि प्रयोजन मलभमानोऽपि केवलमात्मनि स्वेनैव निहितेन मिथ्यागौरवेणाध्मात आत्मानं राजकल्प ममन्यत। स एकदा वीध्यां गच्छं स्तदभिमुख मतित्वरया समागच्छतः कस्यचि त्तुरुष्कस्यांसेन स्वांसे समघट्टचत। तदा तदंसाघट्टन मसहमानोयं राजाश्रितस्तं संबोध्य रे मूढ! विस्तीर्णायामपि वीध्यां किमिति मम मार्गं दत्वा दूरतो नगच्छसि? किमिति मामंसे घट्टितवानसि किन्नजानासि त्व म्मां राजमित्रम्?" इति महता कोपेन सदर्प मवधीरयामास। तदाकर्ण्य सतुरुष्क स्त्वरया गच्छत स्स्वस्य गमने विलंबाचरणेनावधीरणोक्त्याच द्विगुणीकृतक्रोधः "रे दास्याःपुत्र! अतित्वरया गच्छतो मे मार्गं विहाय स्वयमेव दूरादगच्छन्किमित्येवं जल्पसि? तूष्णीमपेहि" इत्युक्त्वा स्वकार्यायाऽगच्छत्। अनेन द्वितीयेन तिरस्कारेण नितरां खिन्नोऽयं राजाश्रितः एत न्निवेदयितुं राजान्तिकं ययौ। राजाच वृत्तान्तमेनं श्रुत्वा 'त्वरया गच्छतः पुरुषस्या कामेनांसे घट्टनं नैव विशेषापराधः ना तोऽयं दंड मर्हति' इत्यवदत। तावताप्यश्रा

न्तोऽयं राजाश्रितः 'देव! तमेनं भवत्सकाशमानाय्य भवान् सर्वं सम्यग्विचारयतु। किमित्ययं मां दास्याःपुत्रे त्याह्वयतेति' इति सनिर्बंधं राजान मूचे। राजापि परदिने तमभिमुखागतं पुरुष मानाय्य 'किमित्येनं वीध्यां गच्छन्त मंसे घट्टितवानसि?' किमितिवा दास्याःपुत्रेत्येन माह्वयः? इत्यपृच्छत्। 'महाराज! त्वरया गच्छतो मे सोऽकामतोऽस्यांऽसेऽघट्टचत। तावतैवायं मह्यं क्रुध्यन्मां मूढेत्याह्वयत्। मयाप्ययं दास्याःपुत्रेत्याकार्यत' इति स यथावृत्त न्यवेदयत्। 'तवायंविपक्षो वृत्तं यथाव देव निवेदयति, किमिदानीं करणीयं?' इति स्वाश्रितं पृच्छति राजनि, सोवदत् 'तिष्ठतु तावदंसे संघट्टनम्। यन्मा मयं दास्याःपुत्रे त्याह्वयत्, तत्रैव किंचित्प्रति विधातव्यम्, भवदाश्रितोहं न दास्याःपुत्र इति भवा न्सम्यग्वेद। तस्मा दितःपर मां न कोपि दास्याःपुत्रे त्याह्वयेत्। एव मेव नगरे सर्वत्रोद्घोषणाकार्या' इति। ततो राजाज्ञया "राजाश्रितोय न दास्याः पुत्रः" इति नगरे सर्वत्रोद्घोषणायां कृतायां नगरस्थ स्सर्वो जनोऽमन्यत-अप्रसक्तप्रतिषेधा द्राजाश्रितोयं दास्याःपुत्र एवेति। एवं—

प्रकाश्य मप्रकाश्यं च न जानंत्य विवेकिनः।
यशः प्रकाश्य मयशो न प्रकाश्यं कथं चन ॥

श्रेष्ठिनः कथा-११.

चिन्तामणिनाम्नि नगरे धनपालो नाम कश्चिच्छ्रेष्ठी महता मूलधनेन वाणिज्यं कुर्वन्महतीं रूयाति मविंदत । तस्य त्रिलोकसुन्दरी रूपशिखानाम काचित्कन्याऽजायत। सोपितां महता प्रेम्णा पोषयन्नपि सदैव वाणिज्यनिमग्नचित्ततया प्राप्तयौवनामपि तां कस्मैचन गुणवते स्वजातीयाय वराय प्रदातुं नाजानात् । एवंस्थित एकस्मिन्दिने सजातीयः कश्चि त्कन्यार्थी सर्ववरगुणसंपन्न स्तद्गृह माययौ। धनपालोऽप्यापणा द्गृह मागतोऽतिथिमागतं वीक्ष्याऽऽगमनप्रयोजनं पृष्ट्वा तेन स्वगुणाविष्कारपुरस्सरं स्वकार्ये निवेदितेपि, तस्मै कन्यां दातु मजानन्नेवाऽऽपणं जगाम। स्वपित्रा साकं संभाषणसमयएव वरस्य गुणा न्गृहीतवती प्राज्ञी सा रूपशिखा तद्गुणक्रीतेव गांधर्वेण विधिना तं परिणीय तेन साकंतन्नगरंप्रति प्रातिष्ठत। आपणा द्रात्रौ गृह मागतो धनपालो वृत्तान्तमिमं श्रुत्वा सुतासमानयनाय स्वयमेव प्रस्थितः किंचिद्दूरं गत्वा नातिदूरे गच्छन्तौ द्वौ मनुष्याकृती दृष्ट्वा ता वुच्चैराह्वयत् । तस्य सुताजामातृभूतौ तावेव तस्याऽऽह्वानं श्रुत्वा 'जाल्मोयं पश्चादायाति। कि मिदानी मावाभ्यां करणीयमिति

विचिंत्योभावुपायमेवं कल्पयामासतुः । मूढोऽयं त्वामेतादृशं नजानाति, अत स्त्वमत्रैव स्थित एवं कुर्वित्युक्त्वा सा स्वयं कुत्रचि द्गुल्मे न्यलीयत। श्रेष्ठीच तदंतिक मागत्य किंत्वया काचित्कन्या कश्चित्पुरुषश्च दृष्टा वित्यपृच्छत्। 'स्वकार्यवशा दतित्वरया प्रस्थितोऽहं न त्वया सह संभाषणाया प्यवसरं लभे' इति तेनोक्ते जाताशंक श्श्रेष्ठी 'सखे कीदृशी ते कार्यत्वरा? यया संभाषणाया प्यवकाशो न त्वया लभ्येत' इत्यपृच्छत् । 'स्वकन्याया अदर्शनेन धनपालोमृतः । तद्दाहाथ इंधनाहरणाय तद्भ्रातरं धान्यपाल मानेतुं त्वरया प्रस्थितोहम्, नकन्यां नापि पुरुषं दृष्टवानस्मि' इति तेनोक्ते, 'अहोबत! अहमेव धनपालः, धान्यपालस्य भ्राताच। कथमयं मां मृतं वक्ति' किमहं सत्यमेव मृतोस्मि! न जाने, साधु गृहं गत्वा गृहिणीं पृच्छामि' इति वदन्नेव सश्रेष्ठी स्वगृहं प्रतिनिवृत्य पत्नी मपृच्छत्' भार्ये! किमहं मृतोस्मि?' इति। तच्छ्रुत्वा सा तन्मौढ्यंप्रति शोचन्ती 'रेमूढ! त्वं मृतश्चेत्कथं भाषेथाः? न त्वं मृतः। किंतु धीशून्यो मृतकल्पः' इत्यवदत् । तत्सुताच गुल्मा द्बहिरागता स्वपतिना सह तन्नगरं गत्वा सुखमुवास। एवं—

धनरागांधमनस स्स्वात्मानं विस्मरन्त्यपि ॥

श्रेष्ठितुरुष्कयोः कथा–९२.

कार्यस्य साध्यासाध्यत्वे न जानन्त्य विवेकिनः ।

मथुरापत्तने धनदत्तोनाम कश्चिच्छ्रेष्ठी स्वपुत्रस्य विवाहे यात्रोत्सवाय तस्मिन्नेव नगरे निवसतः कस्यचि त्तुरुष्कस्य सकाशा देकं गजं न्यासतयाऽऽनीय तमलङ्कारादिभि रलङ्कृत्य तदुपरि पुत्रं स्नुषांचारोप्य ससंभ्रमं यात्रोत्सवं निर्वर्तयामास। ततश्च गजं तुरुष्काय प्रत्यर्पयितुं प्रयतमानएव श्रेष्ठिनि दैवा त्सगजो व्यापद्यत । तेन भृशं व्याकुल श्श्रेष्ठी गजस्वामिनं तुरुष्कमेत्य वृत्तान्तमेत मावेद्य गजस्य प्रतिनिधि गजान्तरं तन्मौल्यंवा दास्यामीत्यवदत् । तच्छ्रुत्वाऽतीवकुपित स्तुरुष्कः प्राड्विवाकमेत्य वृत्तं न्यवेदयत् । प्राड्विवाकोपि दैवादारतिते विपर्यये गजान्तरं मौल्यंवा भवा न्गृहीतु मर्हती त्यवदत्। तद्वाक्यं तुरुष्केऽननुमन्यमाने प्राड्विवाको विषयमिमं श्वो विचारयितास्मी त्युक्त्वा तौ प्रेषयामास। 'दुर्मतिरयं तुरुष्को नास्मदुक्तिं प्राड्विवाकोक्तिं वाऽनुमन्यते, अतएवं करिष्ये' इति मनसि विचिन्त्य सश्रेष्ठी परेद्युः स्वगृहे किंचिदुद्घाटितस्य कवाटस्य पश्चा त्कानिचि ज्जीर्णानि मृण्मयानि भांडानि निधाय स्वयं गृहाभ्यंतर एवावतस्थे। श्वोभूते तुरुष्को न्यायाधिकरणमेत्य तत्र श्रेष्ठिन मपश्यं स्त्वरया तद्गृहद्वारमेत्य कवाटं किंचिदुद्घाटितं दृष्ट्वा श्रेष्ठिन मन्तस्स्थित विज्ञाय महता वेगेन कवाटं पश्चा दुद्घाटयामास। तदा तस्य पश्चाद्भागे निहितानि जीर्णानि मृद्भांडानि सर्वाण्यपि भग्नान्यभवन् । तत श्श्रेष्ठी 'हन्तभोः! मम गृहं प्रविश्यायं तुरुष्कोऽस्मत्पूर्वपुरुषै श्चिरात्संचितानि मृद्भांडानि सर्वाण्यपि चूर्णीचकार' इति प्रतिवेशिनां यथेदं विदितं भवे त्तथा क्रोश न्नव तेनसाकं न्यायाधिकरणमेत्य प्राड्विवाकाय वृत्तान्तमिमं कथयामास। आहच, 'प्रभो! अस्मत्पूर्वपुरुषै श्चिरसंभृताना मेषां भांडानां भांडान्तरं मौल्यं वा नाहं ग्रहीष्यामि । मदीयान्येव भांडान्यभग्नान्यनेन दापयितव्यानि' इति । तच्छ्रुत्वा प्राड्विवाके 'किमत्रोत्तरं प्रतिपद्यते भवान्?' इति तुरुष्कं पृच्छति, न किंचिद प्युत्तरं प्रतिपद्यमान स्सतुरुष्कः 'गजनाशजनितो पराधो भाजननाशजनितेना पराधेन परामृज्यत इत्युक्त्वा तूष्णीं स्वगृहं ययौ ।

मृतस्योज्जीवनं जंतोः को वाञ्छे द्धीयुतो जनः? ॥

अधमर्णस्य कथा–९३.

विशाखपुरेनाम पत्तने कश्चि त्कर्षकः कस्माच्चि द्धार्धु-

षिका च्छ्रेष्ठिनो धन मादाय तदर्थं पत्रं विलिख्य तस्य हस्तेऽददात्। कस्माच्चित्कालात्परं श्रेष्ठीतं कर्षकं मूलधनं वृद्धिंच देहीत्ययाचत। कर्षकोपि कांचिद्दिवसं निर्दिश्या स्मिन्दिवसएतस्यां वेलायां मदीयेक्षेत्रेहं वर्तेय । पत्रमादाय यदि त्व मागमिष्यसि । तदा ते धनं तत्रैव दास्यामीत्यवदत्। तद्वाक्य मनुसृत्य श्रेष्ठी पत्रमादाय क्षेत्रस्थं कर्षक मगमत् । तदा कर्षकः पत्रं हस्ते गृहीत्वा समंततो विलोक्य पत्रेलिखितं पठन्निव तत्खंडशो विदार्य समीपस्थे ग्नौ प्रज्वलिते तत्राक्षिपत् । क्षणा द्भस्मीभूतेतस्मि न्भृशं निर्विण्णो धनस्वामी प्राड्विवाकमेत्य वृत्तान्तमस्मै व्यजिज्ञपत्। ततः प्राड्विवाकः कर्षकमानाय्य त्वया लिखितं श्रेष्ठिनः पत्रं किं त्वं विदारितवानसीति यदा पृच्छति, तदा, 'स नाहं पत्रं विदारितवान्, नापि मया पत्रं लिखितं नाहं लेखनं जाने। नाप्यंततो मया श्रेष्ठिन स्सकाशाद्धनं गृहीतम्' इति सर्वमेव न्यषेधत् । ततः प्राड्विवाक उपायान्तर मपश्यं श्च्छ्रेष्ठिनं रहस्याहूय तन्मुखेन तत्त्वं विदित्वा तेन लिखितं पत्रं कियत्परिमाण मासी दित्यपृच्छत् । द्वादशांगुलपरिमाणं तदभूदिति तेनोक्ते हस्तद्वयपरिमाणं तदभवदिति तस्याग्रे पृष्टेन

त्वया वक्तव्यमिति तं शिक्षित्वा परोक्षे द्वाविमावानाय्य कर्षकस्य पुरतः श्रेष्ठिन मपृच्छदनेन विदारितं पत्रं कियत्परिमाण मभवदिति । हस्तद्वयपरिमाणकं तदभूदिति तेनोक्ते, तच्छ्रुत्वा तावत्क्रुद्धोयं कृषीवलस्स्वय मपृष्टोपि, प्राड्विवाकमालोक्य 'किंभवाद्भिश्शूयतेऽस्य मिथ्याभाषिण श्श्रेष्ठिनो वाक्यम्? यो द्वादशांगुलपरिमाणं पत्रं हस्तद्वयपरिमाणक मिति भवदग्रएव निरर्गल मपभाषते। एतादृशो मिथ्यावादी कुत्रान्यत्र कीदृश मसत्यं वानवदेत्। अतो नास्य वाक्यं विश्वसनीयम्' इत्यवदत्। प्राड्विवाकोवदत् 'धनमगृहीतवतः पत्रंचालिखितवतः पत्रप्रमाणं कथं विदितं भवेत्? द्वादशांगुलपरिमाणं तदभवदिति किल भवान्वक्ति' इति । तच्छ्रुत्वा सहसा क्रुद्धेन मया यदेव निषेद्धव्यं तदेव सुव्यक्तं स्फुटीकृतम्। इत्यात्मनोकौशलं मनस्येव चिंतय न्नोत्तरं किंचित्प्रतिपेदे । तेन प्राड्विवाकः कर्षकेन लिखितं पत्रं तेनैव विदीर्णमिति तद्वाक्यादेव प्रतीत्य तेन श्रेष्ठिनो धनं दापयामास । एवं—

नैव जानंत्यवक्तव्यं वक्तव्यंवा क्रुधान्विताः ॥

आपणिकस्य कथा-५४.

कस्मिंश्चिन्नगरे कश्चित्पुरुषोऽन्नापणमेक मवस्थाप्य सुभो-
ज्यानि भक्ष्याण्य न्नादीनिच निर्माय तत्रत्येभ्य आगंतुके-
भ्यश्चा पेक्षिते समय आहारं कारयन्नासीत् । एवंस्थिते
तस्मिन्नेव नगरे निवसन्कश्चन दुर्गत स्स्वाहारायापि
पर्याप्तं द्रविण मर्जितु मपारय न्यत्रकुत्रापि लब्धेना
त्यल्पेना न्नेन वृत्तिं कुर्व न्नस्यापणस्य पार्श्व मेत्य महान-
सस्य वातायना द्बहिर्निर्गच्छन्तं पच्यमानस्य भक्ष्या दे
र्गंधेन सुरभि गन्धवह माजिघ्रं स्तेनैव परां निर्वृतिं लभमान
आसीत् । अस्यैतादृशं क्रमं बहून्दिवसा न्दृष्ट्वाऽऽप-
णिक स्तेन स्वायते र्यत्किंचि च्चुचते रभावेपि, केवलं
तदागमनमेवा सहमानो गंधाघ्राणेन तमृणिन मुक्त्वा
तंमौल्यं ययाचे । सोपि दुर्गतो नाहं ते ऋणी, नवा
मम सकाशे किंचि द्द्रव्यमस्तीत्यवदत् । एवं विवदमानौ
तौ प्राड्विवाकसकाश मगच्छताम् । सोपीमं वृत्तान्तं
श्रुत्वा तं दुर्गत मनपराधिनं ज्ञात्वा नायं दंडार्ह इत्यव-
दत् । तेनासंतुष्टे तस्मिन्नापणिके गंधाघ्राणेन घ्राणेंद्रिय
माप्यायितवतोऽस्माद्यत्किंचि न्मौल्यं दापयितव्य मेवेति
सनिर्बंध मुक्तवति प्राड्विवाको दुर्गतं संबोध्य तव निकटे

कियद्द्रव्यं वर्तत इत्यपृच्छत् । नैकापि काकिणी मन्निकटेऽ
स्तीति सदैन्य मुक्तवति तस्मिन् जातानुकंपोऽयं प्राड्विवाक
स्स्वभस्त्रिकाया श्शतं रूपकाण्युद्धृत्य स्वपुरोनिहिते लेख-
नाधारे मंचे निवेश्य, दुर्गतमालोक्य तेष्वेकैकं त्वं ध्वनयन्नेव
गणये त्यादिशत् । तत श्चापणिकं संबोध्य न त्वयोत्तरस्मि
न्काले रूपकाणा मसाधुतायां विवादोऽप्युत्पादनीयः,
अत इदानीमेवा वधानेन शृणु प्रत्येक मेकैकस्य शब्द
मित्यवदत् । तच्छ्रुत्वा स्वस्मै रूपकाणां दानं मनसि
संकल्प्याऽतीवसंतुष्ट आपणिकोऽवधानेन रूपकेष्वेकैक-
स्यापि शब्दं शृण्वन्नास्त । सशब्दं रूपकेषु सर्वेषु परि-
गणितेषु तेषां संग्रहाय स्ववस्त्रांचलं मंचस्योपरि वितत्य
स्वहस्तं पुरः प्रसारयति तस्मिन्नापणिके, प्राड्विवाकोऽ
वदत् 'भो लोभात्मन् गंधाघ्राणेन ऋणिन मेन मृणा-
न्मोचयितु म्मयाऽस्मै दत्तानीमानि न भवान् स्प्रष्टु मर्हति,
त्वदीय आपणे गंधाघ्राणेन स्वस्यैकमिंद्रिय माप्यायित-
वानयं त्वत्पुरतएव सशब्दं रूपकाणां गणनेन ते श्रोत्रं
चक्षुश्चेतींद्रियद्वय माप्याययामास । गच्छेदानीं पर्याप्तेन
मौल्येन संतुष्टः' इति । तच्छ्रुत्वा भग्नाशोऽय मापणिक
स्तूष्णीं समगच्छत् । दुर्गतोऽपि प्राड्विवाका ल्लब्धेन रूपकाणां

शतेन परं परितुष्ट स्ततआरभ्या पणद्वार मगच्छन्
स्वगृहएव सुखं न्यवसत् ।

वणिग्भिक्षुकयोः कथा-५५.

अवन्तीषूज्जयिन्यां शान्तचित्तोनाम कश्चिद्भिक्षुरासीत्।
सप्रत्यहं तत्रतत्रो पलब्धेन भैक्ष्येण वृत्तिं कुर्वन्नासीत् ।
एकदा स भिक्षार्थं कस्यचि द्वणिजो गृहं प्रविष्ट स्तत्र
भिक्षां दातुमागतां वणिजो दुहितरं विलोक्य तत्सौंदर्येण
मोहितो दुःखेन तप्यमापो हाहेति वदन्भिक्षा मादायाप-
ययौ । वणिक्तु तस्य हाहाशब्दं श्रुत्वा किमित्ययं भिक्षु-
र्मद्दुहितरं वीक्ष्य हाहेत्युक्तवान् इति शंकया पर्याकुलितहृ-
दयो मठिकामेत्य भिक्षुकं तत्कारण मपृच्छत् । दुहिता
ते मंदभागिनी, दुर्लक्षणा च । यदा तस्या विवाहो भविता,
तदा सपुत्रदारस्य ते मरणं ध्रुवं स्यादिति जानतामया
त्वयि स्नेहा त्तथोदीरित मित्युक्तवति भिक्षुके, भीतोऽयं
वणिक् तत्परिहारोपायं तमेवा पृच्छत् । तदाऽयं दुरात्मा
भिक्षुक स्तां कामयमानः 'कस्यांचि त्पेटिकाया मेनां निधाय
सपिधानां सदीपां पेटिकां रात्रौ गंगायां विसृज' इत्यवदत्।
ऋजुप्रकृतिरयं वणिगपि दुहितृविनाशेनापि सपुत्रदार-
स्यात्मनः क्षेम मन्विच्छ न्भिक्षुकोक्तं सर्वं तथैवाचर

तिस्म । अत्रांतरे मृगयागतः कश्चिद्राजसुत स्तेनमार्गेण।
गच्छन्नद्यामयान्तीं सदीपांपेटिकां दृष्ट्वा तीव्रविस्मित
चित्त स्स्वभृत्यैः पेटिकां तामानाय्य याव दुद्घाट-
यति, तावत्त्रिलोकसुंदरीं कन्यकां काञ्चि दपश्यत् । तत
स्तां पेटिकाया उद्धृत्य तत्रैव पेटिकायां मृगयात आनीतं
कंचिदृक्षं निवेश्य यथापूर्वं सपिधानां सदीपां तां गंगायां
विसृज्य, पितरि निर्वेदात् राजकुमारलाभेन हर्षाच्च तत्प-
रिणये कृतानुमत्या तया साकं राजकुमार स्स्वगृहं गत्वा
नवोढया तया सुचिरं सुख मुवास । पेटिकापि नद्यां याव
त्किंचिद्दूरं गच्छति, तावत्सभिक्षुक स्स्वमनसि चिंतितं
सर्वं तथैव निष्पन्नं भावयन् स्वशिष्यैस्सह सव्याजं नदीं
प्राप्तः पेटिका मायान्तीं विलोक्य हृष्टचित्त स्स्वशिष्याना-
हूय, पेटिका मेतां सशब्दामप्यनुद्घाटितपिधानाम्मे मठमा-
नयते त्यादिदेश । तेषु तथा कुर्वत्सु कस्मिंश्चि दाभ्यंतरे
गृहे समानीतां तां पेटिका मुपेत्य यतिस्स्वयमेकएव
यावत्पिधान मुद्घाटयति । तावद चिरनिरुद्धो भल्लूको
महता कोपेनोत्थितो भिक्षुकस्य कर्णनासं विदार्य क्वापि
पलाययामास । एव मयुक्तां क्रियां कर्तुं प्रवृत्तोऽयं भिक्षुका-
पशदो विदारितकर्णनासः कस्यापि वक्तुमप्यनीश्वर
स्स्वस्वांतांत स्तप्यमानः सर्वेषां हासपात्र मभूत् ।

कलहकारिता कथा-९१.

कस्मिंश्चिन्नगरे प्रतापतुंगो नाम कश्चि द्राजाऽभवत्। तस्यामात्यो बुद्धिसागरो नाम सर्वमेव राज्यं सम्यक्परिपालयन् प्रजानां परस्परं महतीं मैत्रीं प्रवर्धय न्नासीत्। परंतु तस्मिन्नेव नगरे निवस न्कश्चनाधिवक्ता पर्याप्तां जीविका मलभमानो नगरे निवसतां जनानां मध्ये ययोः कयोश्चि द्येन केनापि कारणेन कलह मुत्पाद्य तत्प्रशमनव्याजेन यत्किंचि द्धन मर्जय न्नासीत । तस्य तादृशीं प्रकृतिं श्रुत्वा तत्त्वबुभुत्सया बुद्धिसागर स्तमानाय्य तत्कौशलप्रोत्साहनव्याजेन कथं भवा न्कलह मुत्पादयती त्यपृच्छत्। सोऽवदत्। आर्य सुमहानपि कलहो न महत्कारण मपेक्षते सुसूक्ष्मेणापि कारणेन महा न्कलहोप्युत्पादयितुं शक्यते, पश्य मेऽत्र कौशलं, श्वो नगर्यां कलहमेक मुत्पादयिष्यामीति। एव मस्त्वित्यनुमन्यमानेऽमात्येऽन्येद्यु स्सोधिवक्ता विपण्यां गच्छ न्नेकया काकिण्या मधु क्रेतु मागतं कंचि त्पुरुषं दृष्ट्वाऽयमेव कलहकारणोत्पादनाय क्षमः काल इत्यवधार्य तत्रैव क्षणं तस्थौ। वणिक्च पटलके किंचिन्मधु क्षिप्त्वा मधुपूर्णायाः काचकुप्याः पिधानं याव त्पुन र्निक्षिपति, तावद्देवैको

मधुनो बिंदुः क्षितितले निपपात। तत्क्षणं तत्र गत स्सोधिवक्ता मधुन स्साधुतां परीक्षमाण इव स्वांगुल्या तदादाय मद्येतत्समीचीनमिति वदन्नेव तन्मधु कुड्ये विलिप्य निकटस्थितायां कस्यां चिद्वेदिकाया मुपविष्ट स्स्वकार्यस्य फलंप्रतीक्षांचक्रे। मधुगंधाकृष्टा मक्षिका मधु लेढुं समागच्छन्। मक्षिका भक्षयितुं मुसली काचित्तत्राजगाम। अनु पदं मुसलीं गृहीतुं मार्जालः कश्चि त्तत्रो दपतत्। तथोद्पतन्त मोतुं दृष्ट्वा तज्जिघृक्षया कश्चि त्कुक्कुर आपणान्तः प्रविवेश। कक्कुरा द्भीतो मार्जार स्तत्रतत्रोत्पतन्निपतंश्च तैलपूर्णस्य कस्यचि न्मृद्भांडस्योपरि निपपात। तेन तैलभांडे भिन्ने सर्वमेवतैलं तण्डुलराशा वपतत्। सर्वमे तदृष्ट्वा परिकुपितो वणिग्दंडेनैकेन श्वानं प्राहरत्। तेन शुनकस्यैकस्मिन्पादे भग्ने स तारेण स्वरेण भषन्नात्मन स्स्वामिनं कंचिद्धनिक मभि प्राद्रवत्। तस्य तादृशेन भषणेन भृशं पर्याकुलहृदयो धनिक आपणद्वारास्थितं वणिजमेत्य किमिति मे शुनकं मताडय इत्यपृच्छत्। यतोऽयं ममापणं प्रविश्य मार्जालं भीषयित्वा तैलपात्र मभनक्, ततएनं ताडितवानस्मीत्युक्तवति तस्मिन्, सधनिकः 'बुद्धिमांद्येन त्वदीयानि वस्तूनि सम्यक्परिपालयि

मक्षमः परेषां शुनकां स्ताडयासि। संप्रत्यस्य पादोऽभज्यत। समीकुर्विदानीं मस्यपादं। नोचेदहं ते पादं भनज्मि' इति चुक्रोश। 'दुरात्मन्! दुष्टं शुनक मनिरोधेन तत्रतत्र विसृज्य जनानां वस्तूनां चाभाय मुत्पादयं स्त्वमेव किं मम पादं भनक्षि? अप्रमत्तो जल्प, नोचे द्दंतांस्ते पातयामि' इत्युदीरितं वणिजो वचनं श्रुत्वा नितरां परिकुपितो धनिकः 'दास्याः पुत्र! मम शुनकस्य पादभंगेन मह्यं प्रथमं द्रुह्य स्त्वम्मामेवा प्रमत्तो जल्पेति भषसि! कियती ते धृष्टता मम दंतानां पातने,पश्यामि' इतिवदन्नेव वणिजः कपोले तीव्रमेकं प्रहार मकरोत्। तेन त्रिचतुरेषु दंतेषु भग्नेषु सवणिगुच्चैः क्रोशन्नापणाद्बहिरागत्य धनिकेन साकं नियुद्धायाम्बा रेभे।एवं तयो र्हस्ताहस्ति केशाकेशि युद्धे प्रवृत्ते कलह दर्शनमात्रकुतूहलिनः कृत्यांतरशून्या बहवो जना स्तत्रमिलिताः केचिच्छ्रेष्ठिनः केचिद्धनिकस्य कृत्य मन्याय्यं ब्रुवाणा महान्तं कोलाहल मकुर्वन्। एवं शुनकस्य भषणेन, वणिग्धनिकयो र्वाक्कलहेन जनानां कोलाहलेन च सर्वमेव नगरं क्षुब्ध मभवत्। तदेत त्सर्वं क्रमेण श्रुत्वा परिकुपितो बुद्धिसागर स्तमधिवक्तार मधिवक्तुः पदादवरोप्याऽऽहारमात्रवेतनं तं व्यधात्। तत आरभ्या दृष्टकलहा नागरिका मैत्र्याः परां कोटि मासाद्य सुखेन न्यवसन्।

औचित्यानभिज्ञता. कथा–१७.

पाटलीपुत्रा त्काशीं जिगमिषुः कश्चन स्वयं मार्ग मजानानोऽभिमुखागतं पान्थ मालोक्य कः पंथा वाराणस्या इत्यपृच्छत्। सोऽपि नद्यास्तीरे स्थितं कं चिद्वृक्षं निर्दिश्य, 'पश्यामुं वृक्षं, अस्यैवाग्रे योऽयं मार्गो दृश्यते स एव वाराणसीं गमयति। एवं गच्छतु भवान्' इत्युक्त्वा जगाम। अयं तूक्तमभिज्ञानवाक्यं श्रुत्वा स्वय मौचित्यानभिज्ञतया वृक्ष मतीत्य वर्तमानो मार्ग एव स्वोद्दिष्टः पंथा इत्यजान न्वृक्षस्योपरि भागेऽन्तरिक्षे कोऽपि मार्गो भवेदिति मत्वा वृक्षंगत स्तमारुह्य परितो विलोकयितु मारेभे, निपुणं सुचिरं विलोकमानोऽपि यदा न कंचि न्मार्ग मुपलेभे, तदा, अहो! वृक्षाग्रे मार्गो दृश्यत इति किल तेन पांथेनोक्तम्; ततो वृक्षस्याग्रे स्थितां शाखा मारुह्य तत्र पश्यामीति मनसि निश्चित्यस वृक्षस्याग्रिमां शाखा मारुरोह। साप्यतीव तनुतया तस्य भार मसहमाना नितरां ननाम। एवमंतरिक्षे लंबमानोऽयं पुन र्वृक्षमाश्लिष्या प्यवतरीतु मपारय न्दैवा त्तत्र नद्यां जलपानाय गजमारुह्या यान्तमाधोरणं वीक्ष्य तमाहूयात्मान मवतारयितुं प्रार्थयत। आधोरणोप्यस्य दुर्दशां वीक्ष्यकथमेवं विवेकशून्यो

भवानिति तं विनिंद ज्ञातानुकंप स्तदधोदेशं गजं नीत्वा तस्योपरि स्वय मुत्थितः पुरुषस्य पादौ स्वस्य हस्ताभ्यां याव द्गृह्णाति ताव दुपरि भारस्य न्यूनतां विदित्वा प्रथमतोपि कृतशिक्षाक्रमो गजो भारावतरणधिया स्वशिक्षानुगुणं पुरः प्रचचाल । पूर्वमेकस्य भारमेवा सहमाना तन्वी शाखा द्वयो र्भारं नितरा मसहमाना पुनस्तरां नम्राभूत् । पुरुषस्येव स्वस्यापि तां दशा मालोक्य शाखाभंगभया त्पर्याकुलोऽय माधोरण उपायज्ञतया गजं पुनरपि स्वाधोदेश मानेतुं शिक्षानुगुणं तदाकर्षकं किंचिद्गानं गातु मारेभे । एतादृश्यामपि दशाया मितरैः पराभव मसहमानोऽयं पुरुष आधोरणं संबोध्य 'रे जाल्म! अनभिज्ञो भवान्ममकौशलानां मां निंदितवानभूत् । पश्यतु मे गांधर्वेपि वेदे प्राज्ञतां' इति वदन्नेवा धोरणस्य गीति मनुसृत्य ताला न्दातुं याव त्स्वहस्तौ किंचि च्छिथिलयामास । तावदेव तावुभौ नद्यां पतितौ प्रवाहेणौ ह्रियताम् । प्रथमपतितो प्याधोरणो बाहुभ्यां नदीमुत्तीर्य तीरं गतः पुरुषमप्येवं कर्तु मादिदेश । तच्छ्रुत्वा सपुरुषः 'रेमंद! न बाहुभ्यां नदीं तरेदिति निषेधे जाग्रति कथमिद मकार्यं कार्यं मुच्यते त्वया' इति वदन्नेव प्रवाहेणाकृष्टः कुत्राप्यदर्शनं ययौ ॥

राज भृत्यस्य कथा-१८.

मालवेषु दृढचित्तो नाम कश्चि द्राजा बभूव । तत्सेवापरेष्वनेकेषु भृत्येष्वेकतमो बहुपुत्रोऽल्पवेतनश्चाऽभवत् । गृहकर्मणि व्यग्रया व्ययेचा मुक्तहस्तया स्वपत्न्या समालोकितगृहव्यापारोऽय मल्पेनाऽपि वेतनेनाऽखिलमेव कुटुंबं कथं चित्पोषयन्नासीत् । बहुभृत्यभरिते राजकुले पर्यायेण (यामिकरीत्या) निर्वर्तनीये सेवाविधौ स्वस्वपर्यायेषु विलंबमाना अन्ये भृत्या स्स्वावसरं किंचि दप्यनतिलंघ्य सन्निदधतमप्येनं मिथ्यैवा सन्निदधत राज्ञे न्यवेदयन् । राजाऽपि भृत्येषु यस्यकस्यापि स्वपर्याये द्वित्राणां क्षणाना मतिक्रमेपि तीव्रं दण्डमादि शन्नासीत् । एवं राजादेशं विदितवानयं भृत्य स्स्वयं दंडा द्भीत स्तत्परिहाराय पंचषेषु दिनेषु भोक्तुं पर्याप्त माहारं विक्रीय तल्लब्धेन मौल्येन घटिकायंत्र मेकं क्रीत्वा स्वय मप्रमाद्य न्नुचिते समये राजकुले सन्यदधात् । तेनैवंकृते तदसहमाना अन्ये पिशुनाराजसन्निधिमेत्य कुटुंबभृतये पर्याप्तादपि धनादधिकंभवतो लभमानोऽय मतिस्फीतो भवदाज्ञां तृणाय मन्यते इत्यब्रुवन् । राजाच तद्वृत्तान्तं सत्यं मत्वा स्वोत्प्रेक्षितां तस्योद्धतता मपगमयितुकाम स्सभायामेन माहूय भंग्यंतरेणैवं पप्रच्छ "भोः!

कुटुंबभृतये पर्याप्तादपि धनादधिकं मत्तोधिगच्छता भवता महान्धनराशि रुपाचितो भवेदिति मन्ये । येन महतो धनिकस्येव भवतोऽपि निकटे घटिकायन्त्रमपि सन्निहितं पश्यामि, ब्रवीतु भवान् कां खलु वेलां ते घटीयन्त्रमावेदयतीति." अरुन्तुदेनानेन राज्ञो वचसा भृशं निर्विण्णोऽय भृत्य स्सद्यः प्रत्युत्पन्नमति स्स्वार्जवैकसहायो राजान माह "देव मदीयं घटीयन्त्रं, न निमेषं, न काष्ठां, न कलां, न क्षणं, न मुहूर्तं वाऽऽवेदयति । किन्तु परातिसंधानैकविद्यानां पिशुनानां वचनं निशम्याऽऽजन्मनोप्यशिक्षितशाठ्ये भृत्येप्येव मरुन्तुदानि वचनानि प्रयुञ्जानस्य प्रभो स्सेवायां व्यापृतस्य ममायुषिकति दिनान्य तीतानि, कतिवाऽवशिष्टानीत्ये तदेवावेदयति" इति।तद्वाक्यश्रवणेन विस्मितचित्तेषु सर्वेषु तूष्णीं तिष्ठत्सु ज्ञाततदाशयोऽमात्य स्तं भृत्यं राजसमीप मानाय्य सर्वं तद्वृत्तान्त मपृच्छत्।तेन यथाव न्निवेदिते सकले वृत्तान्ते जातानुकंपो राजा तदार्जवेन परं संतुष्ट स्तं बहुमेने. एव मज्ञातभृत्यशीलाः प्रभवो भृत्यानां क्लेशं कृच्छ्रेण जानन्ति ।

भाषानभिज्ञता. कथा–९९.

कस्यचि द्राज्ञो महती सेनाऽवर्तत । सचा तीव

दयालु स्सेनाया मेकैकमपि योधं भृतेराहारस्यच दानेन सम्यक्पोषयं स्तदातदा यं यं पश्यति तं तं 'कति वत्सरा जातस्य भवतः?" 'कति दिवसा अस्मत्सेनायां वसत स्तव?' 'कि मविलंबेन गृह्येते भवदीयं वेतन माहारश्च?' इति त्रीन्प्रश्ना न्प्रायो निरुक्तेनैव क्रमेण पृच्छ न्नासीत् । एवं राज्ञः क्रमं जानंतो योधा स्स्वसमुदायगतं राज्ञो भाषा मजानान मेकं योधं दृष्ट्वा तमपि राजा जातिमान्प्रश्ना न्प्रक्ष्यतीति मत्वा प्रश्नक्रमानुगुण्येनैव 'विंशति र्वत्सराः' 'षण्मासाः' 'अथकिं, तथैव गृह्येते द्वावपि' इति त्रीण्युत्तराणि त मशिक्षयन् । अयं योधस्तु तेषा मर्थं मजानन्नपि प्रश्नत्रयस्य वाक्यत्रय मुत्तरं मन्वान स्सदैवैतान्युत्तराणि स्मरन्नासीत् । एवं स्थिते कदाचि द्राजा योधमेन मकस्मा दुपेत्य दैवात् 'कति दिवसा अस्मत्सेनायां वसत स्तव?' इति द्वितीयं प्रश्नं प्रथमतोऽपृच्छत् । प्रश्नक्रमं तदर्थंचा जानन्नयं योधो मां राजा प्रथमं प्रश्नं पृच्छतीति मत्वा प्रथमप्रश्नस्यो त्तरतयाऽ वधारितं 'विंशति र्वत्सराः' इति वाक्य मुत्तरयामास । वस्तुतो विंशति वर्षपुरुषाकृति रयं कथं विंशते र्वत्सरेभ्य आरभ्यमे सेनायां वर्तितु मर्हतीति

चित्रीयमाणो राजा तन्निर्णयाय ‘कति वत्सरा जातस्य भवतः’? इति प्राथमिकं प्रश्न मपृच्छत् । राज्ञा द्वितीयः प्रश्नः पृष्ट इत्यवधार्य द्वितीयस्य प्रश्नस्योत्तरं ‘षण्मासाः’ इति वाक्यं योधोऽवदत् । षड्भ्यो मासेभ्य एव पूर्वं जातस्य कथं विंशते र्वत्सरेभ्य आरभ्य सेनायां प्रवेश स्संभवतीति पूर्वतोपि चित्रीयमाणो राजा योधं संबोध्य ‘भोः! कथ मेतत्संभवति? एव सतित्व महं वा मूढो ग्राह्यः’ इत्यवदत् । तृतीयं प्रश्नं पृच्छति राजेति ज्ञात्वा योध स्तृतीयस्य प्रश्नस्योत्तरतयाऽवधारितं ‘अथकिं, तथैव गृह्येते द्वावपि’ इति वाक्यं प्रायुङ्क्त । तच्छ्रुत्वा राजा कथमेवं धृष्टोऽयं योधः, यो मा मात्मानमिव मूढं वदतीत्यतीव क्रुद्धो यावदस्य दंडं विदधाति ताव त्तत्र स्वकार्यवशा दागतोऽमात्यो वृत्तमिमं श्रुत्वा योधस्य भाषानभिज्ञतां राज्ञे निवेद्य त मनपराधिनं प्रकटीचकार । एवं राजसेवानिरतानां राजभाषाया अज्ञाने महाननर्थ आपद्येत । अत स्सर्वैरपि राजसेवापरै राजकीया भाषा ज्ञेया भवति ।

तापसस्य कथा-६०.

गंगाकूले कुत्रचि दग्रहारे ब्रह्मदत्तनाम्नः कस्यचि

द्ब्राह्मणस्य तपोदत्तो नामैकः पुत्रोऽजायत । तस्मिन्पितरि पुत्रं विद्या श्शिक्षयितुं महान्तं प्रयत्नं कृतवत्यपि सबाल स्तत्रतत्रा न्यै र्बालै सह संचरन्नैकामपि कला मध्यैत । प्राप्ते च यौवने वयसि बहुभि र्गर्ह्यमाणोऽयं पुत्रो जातानुशयो विद्याकामो गंगाकूल मेत्य तीव्रं तप स्तप्तु मारेभे । एवं वृथा क्लिश्नन्त मेनं विलोक्य जातानुकंपो भगवान्पुरुषोत्तमो विप्रवेषेणा गत्य तद्दर्शनयोग्ये देशे क्रोशदूरा त्सिकताना मेकैकां मुष्टि मादायादाय तस्य पश्यतएव गंगायां क्षिपन्नासीत् । एतदालोक्याक्षमाकुलो मुनिर्मुक्तमौनो ब्राह्मणं संबोध्य ‘किं त्वयाऽश्रान्तं क्रियते?’ इत्यपृच्छत् । एतदाकर्ण्यापि तूष्णीं स्वकार्ये प्रवृत्तो विप्रो निर्बन्धपृष्टः ‘प्राणिनां संताराय सिकताभि र्गंगाया स्सेतु र्बध्यते मया’ इत्यवदत् । तच्छ्रुत्वा समुनिः ‘रे मूढ! प्रवाहहार्याभि स्सिकताभिः किं गंगाया स्सेतु र्बध्यते?’ इत्यपृच्छत् । विप्रोऽवदत् ‘यद्येत दसाध्यं मन्यसे त्वं, तर्हि कुत स्त्वं श्रुतं पाठं च विना व्रतोपवासाद्यै र्विद्यां साधयितु प्रयतसे? अध्ययनं विना विद्याधिगमो नामानक्षरो लिपिन्यासः, व्योम्नि वा चित्रकल्पना । अध्ययनं पाठं च विना यदि विद्याधिगमो भवे त्तदा न कोपि लोकेऽधीयीत । सर्वोपि

तपसैव विद्यां साधयितुं प्रयतेत' इति। एतदाकर्ण्य समुनि स्तत्तथैवेति मत्वा तप स्त्यक्त्वा गृहं गतो गुरो विद्या अधीत्य सम्य क्पाठादिकं कुर्व न्महा न्पंडित स्समभवत्।

अत स्सर्वेणापि विद्यामधिगंतु मिच्छता गुरो स्सकाशा द्विद्या अधीत्य सम्यक्पाठः करणीयः, तद्दार्ढ्याय दर्शनीया च तदुपदेष्टरि गुरौ देव इवा कपटा निश्चला परा भक्तिः॥

श्रीमत्पण्डितरत्नस्य कुप्पण्णैंगार्यधीमतः ।
शिष्येण तत्पदांभोजमकरन्दैकवृत्तिना ॥ ॥१॥
तत्कृपालब्धवेदान्ततर्कसाहित्यसम्पदा ।
तिरुनारायणार्येण यादवाद्रिनिवासिना ॥ ॥२॥
कल्याणनगरीमध्यराजदांग्लकलालये ।
गीर्वाणभाषोपाध्यायपदवीं समुपेयुषा ॥ ॥३॥
गीर्वाणभाषाभ्यासेच्छुबालबोधाय कल्पिते ।
कथारत्नाकरे तीर्णः कल्लोलः प्रथम स्सुखम् ॥ ॥४॥

श्री सैन्धव कन्धराय नमः

श्रीः